THE FREE INDOLOGICAL COLLECTION

WWW.SANSKRITDOCUMENTS.ORG/TFIC

FAIR USE DECLARATION

This book is sourced from another online repository and provided to you at this site under the TFIC collection. It is provided under commonly held Fair Use guidelines for individual educational or research use. We believe that the book is in the public domain and public dissemination was the intent of the original repository. We applaud and support their work wholeheartedly and only provide this version of this book at this site to make it available to even more readers. We believe that cataloging plays a big part in finding valuable books and try to facilitate that, through our TFIC group efforts. In some cases, the original sources are no longer online or are very hard to access, or marked up in or provided in Indian languages, rather than the more widely used English language. TFIC tries to address these needs too. Our intent is to aid all these repositories and digitization projects and is in no way to undercut them. For more information about our mission and our fair use guidelines, please visit our website.

Note that we provide this book and others because, to the best of our knowledge, they are in the public domain, in our jurisdiction. However, before downloading and using it, you must verify that it is legal for you, in your jurisdiction, to access and use this copy of the book. Please do not download this book in error. We may not be held responsible for any copyright or other legal violations. Placing this notice in the front of every book, serves to both alert you, and to relieve us of any responsibility.

If you are the intellectual property owner of this or any other book in our collection, please email us, if you have any objections to how we present or provide this book here, or to our providing this book at all. We shall work with you immediately.

-The TFIC Team.

परमगुरुश्रीविजयधर्मसूरिभ्यो नमो नमः ।

ॐ

जैनतत्त्वप्रदीपः ।

लेखकः

ए. एम. ए. एस. बीत्युपाधियुक्त-शास्त्रविशारद-
जैनाचार्य-श्रीमद्विजयधर्मसूरीश्वर-
चरणारविन्दभृङ्गायमाणः
न्यायविशारद-न्यायतीर्थ-प्रवर्त्तक-
मुनिश्रीमङ्गलविजयः ।

स च
अनेकश्रीमद्द्रव्यसाहाय्येन
भावनगरस्थ-गांधिभगवानदासात्मजाभयचन्द्रेण
वाराणसीस्थचन्द्रप्रभामुद्रणालये मुद्रयित्वा प्रकाशितः ।

वीरसंवत् २४४४ । विक्रमसंवत् १९७४ ।

प्रति ५०० ।

JAINA TATTVA PRADEEP

BY

Nyaya-Visharad Nyayatirtha Pravartaka

SHREE

MANGAL VIJAYJI MAHARAJ

disciple of

Shastra Visharad Jainacharya

SHREE VIJAYA DHARMASURIJI, A.M.A.S.B.

Printed by Manager GAURI SHANKAR LAL, at the Chandraprabha Press,

BENARES.

Published by ABHAYCHAND BHAGWANDAS GANDHI with the pecuniary help of many gentlemen.

Veer-Era 2444. 500 copies. *A. D. 1918.*

उत्सर्गोद्गारः ।

श्रमेण महता पद्भ्यां गत्वा गूर्जरराष्ट्रतः ।
काश्यां संस्थापितो येन जैनविद्यालयो महान् ॥१॥
तत्रत्यान् प्रौढपाण्डित्यमण्डितान् पण्डितान् पुनः ।
जैनधर्मे स्फुरत्तर्कैर्निःसन्देहीचकार यः ॥२॥
यद्बङ्गदेशे विहारेण येन धर्मोपदेशतः ।
मांसभक्षिनृचेतस्सु रोपितः करुणाङ्कुरः ॥३॥
काशीनरेशप्रामुख्ये सर्वभारतपण्डितैः ।
यः पुनर्भूषयामासे गरिष्टपदमानतः ॥४॥
हिंसादोषनिरासाय दयाधर्मप्रवृद्धये ।
वाराणस्यां कृपालुर्यः पशुशालामतिष्ठिपत् ॥५॥
पुरे योधपुरे येन जैनसाहित्यपर्षदम् ।
उत्पाद्योद्घोषयांचक्रे शिक्षाव्यापारडिण्डिमः ॥६॥
प्रतिग्रामं प्रतिपुरं सर्वतः सार्वभाषणैः ।
लोकोपकारकरणं व्रतं यस्यास्ति निश्चलम् ॥७॥
शरत्सुधांशुपीयूषसुन्दराचारसुन्दरः ।
स श्रीविजयधर्माख्यः सूरिः प्रख्यात एव हि ॥८॥

यत्किञ्चिदुन्नतिं प्राप्तो मादृशोऽपि जडाशयः ।
तत्र हेतुर्न कोऽप्यस्ति त्वत्प्रसादिदृशं विना ॥९॥
गुरो ! त्वत्कृपयैवाऽहमियतीं प्रापितो भुवम् ।
त्वदृणाद् मुक्तमात्मानं कर्तुं नैवास्मि शक्तिमान् ॥१०॥
उत्सृजामि तथाऽप्येतत् किञ्चित् त्वत्करपङ्कजे ।
मन्ये चातो निजं जन्म कृतार्थीभूतमंशतः ॥११॥

मङ्गलविजयः ।

॥ अर्हम् ॥

नमो नमः श्रीप्रभुधर्मसूरये ।

प्रस्तावना ।

न खलु बुधमानिनोऽप्यन्यशास्त्रविहितयथोचितप्रयत्ना अपि विचक्षणाः प्रायः प्रभविष्णवोऽवगाहितुं दुस्तरमपारमार्हतप्रवचनागाधसागरम्, आसतामितरे साधारणमनीषाशालिनो जनाः, इति सुगभीरार्थमपि तत्प्रवचनं सुखेनाधिगन्तुं प्राक्तनैर्भद्रबाहुस्वामि-वाचकमुख्य-सिद्धसेनदिवाकर-जिनभद्रगणिक्षमाश्रमण-हरिभद्रसूरि-हेमचन्द्राचार्यप्रभृतिभिर्दुःषमाररजनिभास्करोपमैराचार्यपुङ्गवैस्तत्साधनभूता अनेके ग्रन्था विनिर्मिताः, तेभ्योऽपि तादृशस्योपकारस्यासंभवं विभाव्य परोपकारनिरतमानसैर्भगवद्भिर्न्यायविशारद-न्यायाचार्य-महामहोपाध्यायश्रीयशोविजयगणिभिरनेके तर्कसिद्धान्तरहस्यपरिपूर्णा विरचिता ग्रन्थाः; किन्तु कालबलेनाधिकाधिकबुद्धिमान्द्यमाबिभ्रतामिदानीन्तनजनानामतिदुरधिगमाः संजातास्ते । अतोऽल्पसंस्कृतज्ञानामपि समासतोऽथ च स्फुटतयाऽऽर्हतमतप्रतिपादितपदार्थतत्त्वज्ञानमिच्छूनां जनानामल्पायासेन तदवबोधाय तत्त्वार्थाधिगमादिग्रन्थानुपजीव्य सरलभाषात्मकोऽयं जैनतत्त्वप्रदीपनामा नूतनप्रणाल्या लक्षणप्रदर्शनपुरस्सरं पदार्थतत्त्वप्रतिपादको ग्रन्थोऽल्पबुद्धिनापि मया सुविख्याताभिधानानां गुरुवर्याणां शास्त्रविशारद-जैनाचार्यश्रीमद्विजयधर्मसूरीश्वराणां, मदीयगुरुभ्रातॄणामनल्पशास्त्रविदग्धबुद्धीनामुपाध्यायश्रीमदिन्द्रविजयानां च कृपयाऽवाप्तसामर्थ्येन प्रणीतः ।

संवेगादिलिङ्गाभिव्यङ्ग्यत्वे सति निसर्गाधिगमजन्यतत्त्वार्थश्रद्धानजनकात्मपरिणामरूपत्वम्, शमादिलिङ्गाभिव्यङ्ग्यत्वे सति तत्त्वार्थश्रद्धानजनकविशिष्टात्मपरिणामरूपत्वं वा सम्यग्दर्शनस्य लक्षणम् ।

अथ तादृशलक्षणान्तर्गतनिसर्गाधिगमयोर्लक्षणे प्रदर्श्येते-

अनिवृत्तिकरणरूपत्वम्, परोपदेशानपेक्षत्वं वा निसर्गस्य लक्षणम् । परोपदेशसापेक्षत्वमधिगमस्य लक्षणम् ।

प्रमाणनयरूपविशेषहेतुकत्वे सति जीवादिपदार्थविषयकयथार्थावगमरूपत्वम्, प्रमाणनयनिमित्तकजीवादितत्त्वविषयकयथार्थावबोधात्मकत्वम्, विषयप्रतिभासित्वे सति आत्मपरिणतिमत् तत्त्वसंवेदनं वा सम्यग्ज्ञानस्य लक्षणम् ।

भवनिमित्तनिवृत्तिशीलत्वे सति सम्यग्ज्ञानवतो योगव्यापारोपरमकत्वम्, भवनिमित्तनिवृत्तिनिमित्तकत्वे सत्यऽव्यवधानेन मोक्षजनकत्वम्, सावद्ययोगविरतिरूपत्वं वा सम्यक्चारित्रस्य लक्षणम् ।

एतेषां जीवादिपदार्थानां विशेषेण ज्ञानं नामस्थापनाद्रव्यभावद्वारा, इति तल्लक्षणप्रतिपादनावसरः; तत्र-

अन्यार्थे स्थितमर्थनिरपेक्षं पर्यायानभिधेयं वस्तुनोऽभिधानम्, पर्यायानभिधेयत्वे सति अन्यार्थेऽन्वर्थे वा स्थितं सत् तदर्थनिरपेक्षसापेक्षान्यतररूपं वस्तुनोऽभिधानम्, स्वेच्छानुरूपं वस्तुनोऽभिधानं वा नाम्नो लक्षणम् ।

तदर्थवियुक्तत्वे सति तदभिप्रायेण तत्सदृशं यल्लेप्यादिकर्मरूपं तत् स्थापनाया लक्षणम्, यद् सद्भूतार्थशून्यं सत् तद्बुद्ध्या तादृशाकारेण निराकारेण वाऽन्यस्मिन्नारोपकरणं तद् वा ।

अतीतानागतपरिणामकरणत्वम्, इदानीमसत्त्वेऽपि भूतभविष्यत्परिणामयोग्यत्वं वा द्रव्यस्य लक्षणम् ।

विवक्षितक्रियानुभूतियुक्तत्वम्, विवक्षिततत्तत्क्रियानुभूतियुक्तत्वं वा भावस्य लक्षणम् ।

अथ प्रमाणनयलक्षणः पदार्थाधिगमोपाय इति, सम्यग्ज्ञानलक्षणान्तर्गतप्रमाणनयस्वरूपजिज्ञासायां वा तल्लक्षणप्रतिपादनम्, सर्वनयावलम्बिविज्ञानविशेषरूपत्वम्, स्वपरावबोधकत्वे सति ज्ञानस्वरूपत्वं वा प्रमाणसामान्यलक्षणम् ।

तच्च प्रमाणं द्विधा, प्रत्यक्ष-परोक्षभेदात् ।

तत्र प्रथमतः परोक्षप्रमाणं लक्षणद्वारा प्रतिपाद्यते—

इन्द्रियानिन्द्रियसापेक्षत्वे सति साकारावगमरूपत्वं परोक्षप्रमाणस्य लक्षणम् । प्रत्यक्षलक्षणं त्विदम्—

इन्द्रियानिन्द्रियानपेक्षत्वे सति व्यपगतव्यभिचारपूर्वकसाकारावगमरूपत्वम्, इन्द्रियानिन्द्रियनिरपेक्षत्वे सति आत्मनः साक्षादर्थपरिच्छेदात्मकत्वं वा प्रत्यक्षस्य लक्षणम् ।

परोक्षं द्वेधा, मति-श्रुतभेदात् । तत्र—

इन्द्रियानिन्द्रियनिमित्तकत्वे सति योग्यदेशावस्थितवस्तुपरिच्छेदरूपत्वं, सम्यग्दर्शनिनः क्षीणाक्षीणदर्शन-

सप्तकस्यावग्रहादिभेदभिन्नस्य ज्ञानविशेषस्य योऽपायांश-स्तद्रूपत्वम्, अवग्रहादिभेदभिन्नस्य ज्ञानविशेषस्य योऽपायांशस्तद्रूपत्वं वा मतिज्ञानस्य लक्षणम् ।

सा च मतिर्द्वेधा, श्रुतनिश्रिताऽनिश्रितभेदात् ।

श्रुतपरिकर्मितमतेर्व्यवहारकाले पुनरश्रुतानुसारितया समुत्पद्यमानबुद्धिरूपत्वम्, शास्त्रपरिकर्मितमतेरुत्पादकाले शास्त्रार्थपर्यालोचनं विनैव जायमानबुद्धिरूपत्वं वा श्रुत-निश्रितमतेर्लक्षणम् ।

श्रुताभ्यासं विना स्वाभाविकविशिष्टक्षयोपशमवशा-ज्जायमानबुद्धिरूपत्वम्, सर्वथा शास्त्रार्थस्पर्शरहितस्य केव-लमतिज्ञानावरणक्षयोपशमानुभावेन यथावस्थितवस्तुपरि-च्छेदकबुद्धिरूपत्वं वाऽश्रुतनिश्रितमतेर्लक्षणम् ।

तत्र श्रुतनिश्रितं चतुर्धा, अवग्रहेहापायधारणाभेदात् ।

अनिर्दिश्यमानसामान्यमात्रार्थग्रहणरूपत्वमवग्रहस्य लक्षणम् । अवग्रहश्च द्विप्रकारः, व्यञ्जनावग्रहः, अर्थावग्रहश्च । तत्र शब्दादिरूपेण परिणतद्रव्याणामुपकरणेन्द्रियैः सह प्रथमतः संप्राप्तसंबन्धरूपत्वं व्यञ्जनावग्रहस्य लक्षणम् ।

तस्माद् मनागनिश्चयरूपत्वमर्थावग्रहस्य लक्षणम् ।

अवग्रहादुत्तरकालमपायात् पूर्वं सद्भूतार्थविशेषोपादा-नाभिमुखोऽसद्भूतार्थपरित्यागपरः "प्रायोऽत्र मधुरत्वादयः शङ्खधर्मा उपलभ्यन्ते, न कर्कश-निष्ठुरत्वादयः शार्ङ्ग-

अवधिज्ञानावरणक्षयोपशमादिहेतुसांनिध्ये सति आत्मनः साक्षाद् रूपिपदार्थपरिच्छेदकरूपत्वम्, आत्मनो रूपिपदार्थमात्रसाक्षात्कारकरणव्यापारविशेषरूपत्वं वाऽवधिज्ञानस्य लक्षणम् ।

मनोरूपेण परिणतद्रव्याणां परिच्छेदकत्वम्, सर्वतोभावेन मनोद्रव्यपरिच्छेदकत्वं वा मनःपर्यायज्ञानस्य लक्षणम् । मनःपर्याप्तिनामकर्मोदये सति मनोयोग्यवर्गणादालिकानि गृहीत्वा जीवेन मनस्त्वेन परिणतानि यानि द्रव्याणि तद्रूपत्वं द्रव्यमनसः, द्रव्यमनआलम्बनत्वे सति जीवस्य मननव्यापाररूपत्वं भावमनसश्च लक्षणम् ।

तच्च मनःपर्यायज्ञानं द्विविधम्, ऋजु-विपुलमतिमनःपर्यायभेदात् । तत्र सामान्याकाराध्यवसायनिबन्धनीभूतकतिपयपर्यायविशिष्टमनोद्रव्यपरिच्छेदकत्वमृजुमतिमनःपर्यायस्य लक्षणम् । विशेषाकाराध्यवसायनिबन्धनीभूतप्रभूताप्रभूतविशेषविशिष्टमनोद्रव्यपरिच्छेदकत्वं विपुलमतिमनःपर्यायस्य लक्षणम् ।

सर्वद्रव्य-पर्यायसाक्षात्कारकारित्वं केवलज्ञानस्य लक्षणम्, सकलवस्तुस्तोमपरिच्छेदकत्वं वा ।

॥ प्रतिपादितमुपयोगस्वरूपद्वारा प्रमाणस्वरूपम् ॥

पूर्वोक्त उपयोगो द्विविधः, साकार-निराकारभेदात् । तत्र साकारः सविकल्परूपः निराकारो निर्विकल्परूपः । साकारश्चाष्टविधः, पूर्वोक्तज्ञानपञ्चकाज्ञानत्रयभेदात् ।

तत्र ज्ञानपञ्चकं प्रतिपादितम्। अथाज्ञानं प्रतिपाद्यते, कुत्सितं ज्ञानमज्ञानम्, मिथ्यादृष्टेर्ज्ञानमित्यर्थः। तच्च त्रिविधम्, मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानभेदात्।

निराकार उपयोगो दर्शनम्। विषयविषयिसंनिपातानन्तरसमुद्भूतसत्तामात्रविषयकाववोधरूपत्वं दर्शनस्य लक्षणम्।

ततो जातमाद्यं सत्त्वसामान्यादवान्तरसामान्याकारविशिष्टवस्तुग्राहकरूपत्वमवग्रहस्य लक्षणम्। ईहादयस्तु पूर्वोक्तलक्षणा एव।

तच्च दर्शनं चतुष्प्रकारम्, चक्षुरचक्षुरवधिकेवलभेदात्। तत्र—

चक्षुरिन्द्रियविषयकसामान्याववोधरूपत्वं चक्षुर्दर्शनस्य लक्षणम्।

चक्षुर्वर्जापरेन्द्रिय-मनोविषयकसामान्याववोधरूपत्वमचक्षुर्दर्शनस्य लक्षणम्।

अवधिदर्शनावरणक्षयोपशमादिवशाद् विशेषग्रहणवैमुख्येन रूपिद्रव्यविषयकसामान्याववोधरूपत्वमवधिदर्शनस्य लक्षणम्।

केवलदर्शनावरणक्षयादिनिमित्तवशात् त्रैकालिकवस्तुविषयकसामान्याववोधरूपत्वं केवलदर्शनस्य लक्षणम्।

अथ लक्षण-विधानाभ्यां नयस्वरूपं प्रतिपाद्यते;—

अनन्तधर्मात्मकवस्तुनि धर्मान्तरौदासीन्यपूर्वकैकध-

र्मोन्नायकाध्यवसायविशेषरूपत्वम्, अनेकधर्मकदम्बकोपेतवस्तुनो धर्मान्तरौदासीन्यपूर्वकैकधर्मेणावधारणात्मकाऽध्यवसायविशेषरूपत्वम्, प्रकृतवस्त्वंशग्राहीतरांशाप्रतिक्षेप्यध्यवसायविशेषरूपत्वं वा नयस्य लक्षणम् ।

स च द्वेधा, द्रव्यार्थिक-पर्यायार्थिकभेदात् । तत्र—

प्राधान्येन द्रव्यमात्रग्राह्यध्यवसायविशेषरूपत्वं द्रव्यार्थिकस्य लक्षणम् ।

उत्पाद-विनाशादिपर्यायमात्रग्राह्यध्यवसायविशेषरूपत्वं पर्यायार्थिकस्य लक्षणम् ।

तत्र द्रव्यार्थिकस्त्रेधा, नैगम-संग्रह-व्यवहारभेदात् । तत्र—

देशसमग्रग्राह्यध्यवसायविशेषरूपत्वम्, सामान्यविशेषोभयाऽभ्युपगमपराध्यवसायविशेषरूपत्वम्, प्रत्यक्षादिप्रमाणैर्घट-पटादिवस्तूनां पृथक्पृथक्करणनिमित्तावबोधानुसारिवचनविशेषरूपत्वम्, लोकार्थनिबोधविषयकुशलाध्यवसायविशेषरूपत्वम्, संकल्पयोनिरूपत्वम्, विचित्रपरिच्छेदकत्वं वा नैगमस्य लक्षणम् ।

सामान्यवस्तुसत्तासंग्राहकाध्यवसायविशेषरूपत्वम्, नैगमाद्युपगतार्थसंग्रहप्रवणत्वे[1] सत्यध्यवसायविशेषरूपत्वं

१ संग्रहप्रवणत्वं नाम तन्नियतबुद्धिव्यपदेशजनकत्वम्, संगृहीतपिण्डितार्थाभ्युपगमपराध्यवसायविशेषरूपत्वं वा । संगृहीतम् = सामान्याभिमुखग्रहणगृहीतम्, महासामान्यं वा; पिण्डितं = विवक्षितैकजात्युपरागेण प्रतिपिपादयिषितम्, सामान्यविशेषरूपत्वं वेत्यर्थः ।

उपभोगान्तरायक्षयप्रभवत्वे सति विषयसंपदि सत्यां तथोत्तरगुणप्रकर्षात्तदनुभवरूपत्वं क्षायिकोपभोगस्य लक्षणम्, उपभोगान्तरायक्षयप्रभवत्वे सति च्छत्र-चामरादिप्रातिहार्यादीनां पुनः पुनरुपभुज्यमानत्वं वा ।

वीर्यान्तरायक्षयप्रभवाप्रतिहतशक्तिविशेषरूपत्वं क्षायिकवीर्यस्य लक्षणम् ।

क्षायिकदानादिपञ्चकस्य लक्षणान्तराण्यपि—

दानान्तरायात्यन्तक्षयप्रभवत्वं क्षायिकदानस्य लक्षणम् ।
लाभान्तरायात्यन्तक्षयप्रभवत्वं क्षायिकलाभस्य लक्षणम् ।
भोगान्तरायक्षयप्रभवत्वं क्षायिकभोगस्य लक्षणम् ।
उपभोगान्तरायक्षयप्रभवत्वं क्षायिकोपभोगस्य लक्षणम् ।
वीर्यान्तरायक्षयप्रभवत्वं क्षायिकवीर्यस्य लक्षणम् ।

क्षायोपशमिकोऽष्टादशविधः, ज्ञानाज्ञानदर्शनदानादिलब्धिसम्यक्त्वचारित्रसंयमासंयमभेदात् । तत्र—

मतिज्ञानावरणादिक्षयोपशमप्रभवत्वं क्षायोपशमिकज्ञानस्य लक्षणम् ।

कुत्सितज्ञानरूपत्वं तादृशाज्ञानस्य लक्षणम् ।

दर्शनावरणक्षयोपशमजन्यत्वं क्षायोपशमिकदर्शनस्य लक्षणम् ।

अन्तरायकर्मक्षयोपशमजन्यत्वं क्षायोपशमिकदानादिलब्धेर्लक्षणम् ।

अनन्तानुबन्धिमिथ्यात्वयोः सर्वघातिस्पर्धकानामुदीर्णस्य क्षयेऽनुदीर्णस्योपशमे च देशघातिनामुदये च सति जातं यत् तत्त्वार्थश्रद्धानं तद्रूपत्वम्, उदीर्णस्य क्षयेऽनुदीर्णस्य चोपशमे सति, अशुद्धपुञ्जस्य प्रदेशोदये सति शुद्धस्य तस्य विपाकोदयरूपत्वं वा क्षायोपशमिकसम्यक्त्वस्य लक्षणम्। द्वादशकषायाणामुदीर्णस्य क्षयेऽनुदीर्णस्योपशमे च संज्वलन-नोकषाययोर्यथासंभवमुदये च सति सावद्ययोगेभ्यः सर्वथानिवृत्तिपरिणामरूपत्वं क्षायोपशमिकचारित्रस्य लक्षणम्, अथवा, अन्तरायसर्वघातिस्पर्धकानामुदीर्णस्य क्षये, अनुदीर्णस्योपशमे च देशघातिस्पर्धकानामुदये च सति सर्वविरतिपरिणामरूपत्वं तत्।

कषायाष्टकसर्वघातिस्पर्धकानामुदीर्णस्य क्षयेऽनुदीर्णस्योपशमे च प्रत्याख्यानादिदेशघातिनां यथासंभवमुदये च सति देशतो विरतिलक्षणपरिणामरूपत्वं देशविरतेर्लक्षणम्।

अत्र क्षायोपशमिकभावलक्षणघटकस्पर्धकस्य अविभागपरिच्छिन्नकर्मप्रदेशानुभागप्रचयश्रेणिक्रमहानिवृद्धिरूपत्वं लक्षणम्। स्वरूपमप्यस्य संक्षेपतो यथा—एकसमयोपात्ते कर्मस्कन्धे येऽणवः सर्वाल्पिष्ठरसयुक्तास्तेऽपि छिद्यमानरसांशकैः सर्वजीवानन्तगुणान् रसांशान् प्रयच्छन्ति। एतेषां चाल्परसाणूनां समुदायः प्रथमवर्गणा। अन्याप-

क्षयाऽत्र भूयांसोऽणवो रसास्तु स्तोकाः। तेषामणूनामेकेन रसांशेनाधिकानां समुदायो द्वितीया वर्गणा। इयं च वर्गणा आद्यवर्गणायाः परमाण्वपेक्षया हीना रसांशापेक्षयाऽधिका। एवं रसविभागभागानामेकैकस्य वृद्धितः परमाणूनां वर्गणा तावद् वाच्या यावदभव्येभ्योऽनन्तगुणा सिद्धानन्तांशमिता। तत्र सर्वाद्यवर्गणापेक्षया सर्वान्त्यवर्गणाणवोऽनन्तगुणाधिकान् रसभागान् प्रयच्छन्ति। तासां वर्गणानां समुदायः स्पर्धकमुच्यते।

औदयिकभावोऽप्येकविंशतिविधः, गतिकषायलिङ्गमिथ्यात्वाज्ञानासिद्धत्वासंयतलेश्याभेदात्। तत्र-

गतिनामकर्मोदयात् विवक्षितभवाद् भवान्तरगमनयोग्यत्वं गतेर्लक्षणम्।

चारित्रमोहोदयात् कलुषितभावरूपत्वं कषायस्य लक्षणम्।

वेदोदयजन्यत्वे सति मैथुनेच्छारूपत्वं लिङ्गस्य लक्षणम्।

अतत्त्वे तत्त्वबुद्धिरूपत्वं मिथ्यादर्शनस्य लक्षणम्।

मिथ्यात्वमोहोदये सति अतत्त्वज्ञानरूपत्वमज्ञानस्य लक्षणम्।

कर्मोदयप्रभवत्वमसिद्धस्य लक्षणम्।

अप्रत्याख्यानावरणीयादिकषायोदये सति सावद्ययोगाद् विरत्यभावरूपत्वमसंयतस्य लक्षणम्।

तानि चेन्द्रियाणि पञ्चधा, श्रोत्र-चक्षु-घ्राण-रसन-स्पर्शनभेदात्। तत्र-

कदम्बपुष्पाभमांसगोलकरूपत्वं श्रोत्रेन्द्रियस्य लक्षणम्

मसूरधान्यसमानाकृतिरूपत्वं चक्षुरिन्द्रियस्य लक्षणम्।

अतिमुक्तकपुष्पसमानाकृतिरूपत्वं घ्राणेन्द्रियस्य लक्षणम्

क्षुरप्रसमानसंनिवेशरूपत्वं रसनाया लक्षणम्।

विविधाकृतिरूपत्वं स्पर्शनेन्द्रियस्य लक्षणम्।

पञ्चेन्द्रिया द्विधा—संज्ञ्यसंज्ञिभेदात्। तत्र—

सुदीर्घातीतार्थस्मरणशीलत्वे सति 'कथं नु नाम कर्तव्यम्' इत्यागाम्यर्थचिन्तनप्रयोजकत्वं संज्ञिनो लक्षणम्।

तद्भिन्नत्वं चासंज्ञिनो लक्षणम्।

जीवस्य गतिर्द्वेधा—ऋजु-वक्रभेदात्। तत्र—

एकसामयिकगतिमत्त्वमृजुगतेर्लक्षणम्।

देहान्तरोपादानाय परभवं प्रस्थितानां जन्तूनां कुटिलगमनरूपत्वम्, शरीरान्तरानिमित्तभूतभवान्तरवक्रगमनरूपत्वं वा वक्रगतेर्लक्षणम्।

तद्भवसिध्यमानस्य जीवस्य ऋज्वी एव गतिः, अन्येषां तु देश-कालादिकमपेक्ष्य भजना[1]।

वक्रगतिप्रस्थितानां जन्तूनां कार्मणशरीरेणैव सह संबन्धः, न शेषशरीर-वाग्-मनोव्यापारैरिति। कर्मकृतम्, कर्मणो विकारः, कर्मणां समूहो वा कार्मणम्। साक्षात् सुख-

१ भजना=विकल्पः=ऋजुर्वक्रगतिर्वेत्यर्थः।

दुःखाद्युपभोगरहितत्वं कार्मणस्य लक्षणम्।

जीवानां संसरणं द्वेधा—देशान्तर-भावान्तरप्राप्ति-भेदात्। तत्र—

ये जीवाः पूर्वशरीरपरित्यागपूर्वकं देशान्तरं गत्वा जन्मान्तरं प्राप्नुवन्ति तेषां देशान्तरप्राप्तिरूपं संसरणम्। ये पुनर्मृताः सन्तः स्वशरीर एव कृम्यादिभावेनोत्पद्यन्ते तेषां भावान्तरप्राप्तिरूपं संसरणम्।

जीवानां गतिरनुश्रेणिर्भवति, न विश्रेणिः। तत्राकाशप्रदेशानुश्रेणिरूपेण जीव-पुद्गलानां या गतिस्तद्रूपत्वमनुश्रेणिगतेर्लक्षणम्, आकाशप्रदेशपङ्क्त्यनुसारेण गमनरूपत्वं वा।

त्रसजीवानां द्विविग्रहपर्यन्तैव गतिः। विग्रहो नाम वक्रता = कुटिलता, तत्प्रधाना गतिर्वक्रगतिः। तत्रैकविग्रहा द्वैसामयिकी, द्विविग्रहा तु त्रैसामयिकी। स्थावराणां त्वेकविग्रहादिचतुर्विग्रहपर्यन्ता गतिः।

अत्रेदं ध्येयम्—त्रसानां निश्चयनयानुसारेणैकविग्रहायां द्विसामयिक्यामप्येकोऽनाहारकसमयः, व्यवहारानुसारेण तु उभयत्राप्याहारोऽस्त्येव। द्विविग्रहलक्षणत्रिसामयिक्यां तु द्वावनाहारकसमयौ निश्चयनयमते, व्यवहारनये त्वेकसमयोऽनाहारकः। एवं त्रिविग्रहायां निश्चयेन त्रयः समया अनाहारकाः, मतान्तरे द्वौ। चतुर्विग्रहायां चत्वारः,

व्यवहारनये त्रयश्चेति । तत्रौदारिकादिपुद्गलानामादानरूपत्वमाहारस्य लक्षणम् ।

स चाहारस्त्रिविधः- ओजो-लोम-कावलिकभेदात् । तत्र-

तैजस-कार्मणयोगेनौदारिकादिशरीरयोग्यपुद्गलानामादानरूपत्वमोजआहारस्य लक्षणम् ।

त्वगिन्द्रियादिद्वारा शरीरोपष्टम्भकपुद्गलादानरूपत्वं लोमाहारस्य लक्षणम् ।

मुखे कवलनिक्षेपरूपत्वं कावलिकस्य लक्षणम् ।

तादृशाहाराभावरूपत्वमनाहारस्य लक्षणम् । तद्वांश्चानाहारकः ।

जन्म त्रेधा— संमूर्च्छिम-गर्भोपपातभेदात् । तत्र—

गर्भसामग्रीं विना समुद्भूतस्वरूपत्वं संमूर्च्छिमस्य लक्षणम्, लोकत्रये यथायोगं देहावयवविरचनरूपत्वं वा ।

शुक्रशोणितसंमीलनाधारप्रदेशवत्त्वं गर्भस्य लक्षणम् ।

क्षेत्रप्राप्तिमात्रनिमित्तकं यज्जन्म तद्रूपत्वम्, गर्भसंमूर्च्छिमप्रकारराहित्येन जायमानत्वं वोपपातजन्मनो लक्षणम् ।

जन्म योनिद्वारा भवतीति तल्लक्षण-विधानानि प्रतिपाद्यन्ते । तत्र-

तैजस-कार्मणशरीरवन्तो जन्तव औदारिकादिशरीरयोग्यस्कन्धसमुदायेन यत्र स्थाने युज्यन्ते तादृक्स्थानरूपत्वं योनेर्लक्षणम् ।

सा त्रेधा, संवृत-विवृत-मिश्रभेदात् । तत्र—

न्द्राद्युपलब्धिविषयकोपभोगजननाभावरूपत्वं वा कार्मण-शरीरस्य लक्षणम्।

पुनरपि ते जीवास्त्रेधा, स्त्री-पुरुष-नपुंसकलिङ्गभेदात्। तत्र—

योनिमृदुतास्थैर्यमुग्धता-स्तनक्लीवता-पुंस्कामनाभिमतादिचिह्नवत्त्वं स्त्रीलिङ्गस्य लक्षणम्।

मेहन-खरता-दार्ढ्य-शौण्डीर्य-श्मश्रु-धृष्टतादिचिह्नवत्त्वं पुरुषलिङ्गस्य लक्षणम्।

मोहानलसुदीपितत्वे सति स्तन-श्मश्रु-केशादिभावाभावसमन्वितत्वं नपुंसकलिङ्गस्य लक्षणम्।

जीवानामायुर्द्वेधा, सोपक्रम-निरुपक्रमभेदात्। तत्र—

आगमोक्ताध्यवसानाद्यायुःक्षयकारणैर्बहुकालेन भोग्यं यदायुरल्पकालेन भुज्यते तद्रूपत्वम्, बन्धकाले शक्यापवर्तनस्वरूपशिथिलबन्धनेन यदायुर्बद्धं तद्रूपत्वं वा सोपक्रमस्य लक्षणम्[1]।

यद् गाढनिकाचनेन बन्धकालेऽशक्यापवर्तनस्वरूपक्रमवेद्यफलकमायुर्बद्धं तद्रूपत्वं निरुपक्रमस्य लक्षणम्[2]।

पुनरपि स जीवश्चतुर्विधः, नरक-तिर्यग्-मनुष्य-देव-गतिभेदात्। तत्र—

---

१ अत्र पिण्डीकृतरज्जुदहनमुदाहरणम्। २ आयतीकृतरज्जुदहनमिह निदर्शनम्।

अशुभतराशुभतमलेश्यादिपरिणामवत्त्वे सति नरकगतिनामकर्मोदयरूपत्वं नरकगतेर्लक्षणम् ।

तिर्यग्गतिनामकर्मोदयरूपत्वं तिर्यग्गतेर्लक्षणम् ।

मनुष्यगतिनामकर्मोदयरूपत्वं मनुष्यगतेर्लक्षणम् ।

तत्र मनुष्या द्विविधाः, आर्य-म्लेच्छभेदात् । तत्र–

हिंसा-ऽसत्यादिहेयधर्माद् दूरीभवनशीलत्वमार्यस्य, तद्विपरीतस्वरूपवत्त्वं च म्लेच्छस्य लक्षणम् ।

आर्याश्च कर्मभूमिजा इति तल्लक्षणं निगद्यते—

सम्यग्दर्शनादिरूपमोक्षमार्गज्ञातृत्त्वोपदेष्टृत्वादीनामुत्पत्तिस्थानरूपत्वं कर्मभूमेर्लक्षणम् ।

प्रायशः शुभतरादिलेश्यादिपारिणामवत्त्वे सति देवगतिनामकर्मोदयरूपत्वं देवगतेर्लक्षणम् ।

देवाश्चतुर्विधाः, भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकभेदात् । तत्र-

देवगतिनामकर्मोदये सति भवननिवासशीलत्वं भवनपतेर्लक्षणम् ।

देवगतिनामकर्मोदये त्रिविधप्रदेशेषु निवासशीलत्वे च सति अनियतगतिप्रचाररूपत्वं व्यन्तरस्य लक्षणम् ।

देवगतिनामकर्मोदये सति प्रकाशस्वभावरूपत्वं ज्योतिष्कस्य लक्षणम् ।

विमाने भवनशीलत्वं वैमानिकस्य लक्षणम् ।

भवनपति-वैमानिकनिकाययोर्दशधा देवाः सन्ति,

इन्द्र-सामानिक-त्रायस्त्रिंश-पार्षद्यात्मरक्षक-लोकपालानीक-प्रकीर्णकाभियोग्य-किल्विषकभेदात् । तत्र—

देवगतिनामकर्मोदये सत्याधिपत्यशालिरूपत्वमिन्द्रस्य लक्षणम् ।

देवगतिनामकर्मोदये सत्याधिपत्याभावे च सतीन्द्रसमानर्द्धिकत्वं सामानिकस्य लक्षणम् ।

इन्द्रस्यैव मन्त्रि-पुरोहितस्थानाधिरूढत्वं त्रायस्त्रिंशस्य लक्षणम् ।

तस्यैव वयस्यस्थानीयत्वं पार्षद्यस्य लक्षणम् ।

तस्यैव आरक्षिकार्थचरस्थानाधिरूढत्वं लोकपालस्य लक्षणम् ।

तस्यैव शिरोरक्षस्थानाधिरूढत्वमात्मरक्षस्य लक्षणम् ।

तस्यैव सेनास्थानाधिरूढत्वमनीकस्य लक्षणम् ।

तस्यैव पौरजनस्थानाधिरूढत्वं प्रकीर्णकस्य लक्षणम् ।

तस्यैव दासस्थानाधिरूढत्वमाभियोग्यस्य लक्षणम् ।

तस्यैवान्त्यजस्थानाधिरूढत्वं किल्विषिकस्य लक्षणम् ।

व्यन्तर-ज्योतिष्कयोर्लोकपाल-त्रायस्त्रिंशवर्जा अष्टधा ।

भवनपति-व्यन्तर-ज्योतिष्क-सौधर्मेशानपर्यन्ता देवाः कायेन प्रवीचारं कुर्वन्ति । तत्र प्रवीचारो नाम मैथुनव्यवहाररूपत्वम् । शेषेषु द्वयोर्द्वयोः स्पर्श-रूप-शब्द-मनोविषयकप्रवीचारा भवन्ति ।

द्रव्यं द्वेधा, अद्रव्यं द्रव्यम्[1], अनेकद्रव्यं द्रव्यं च[2]।

गुण-पर्यायवत्त्वं द्रव्यसामान्यस्य लक्षणम्।

सहभावित्वं गुणस्य लक्षणम्।

क्रमभावित्वं पर्यायस्य लक्षणम्।

ननु हस्तिशरीरवर्ती जीवो यदा कर्मवशात् कीटिका-शरीरं गृह्णाति तदा तावन्मात्रशरीरस्थानामात्मप्रदेशानाम-त्राल्पतरशरीरे कथं समावेशः? इत्याशङ्कायामुच्यते—

प्रदेशसंहारविसर्गाभ्यां सङ्कोचविकाशौ भवतः।

कार्मणशरीरनिमित्तवशाद् गृहीतसूक्ष्मनामकर्मानुवर्त्त-नरूपत्वम्, कर्मवशाद् गृहीतसूक्ष्मनामकर्मानुसरणरूपत्वं वा प्रदेशसंहारस्य लक्षणम्।

कार्मणशरीरनिमित्ताद् बादरनामकर्मानुसरणरूपत्वं प्रदेशविसर्गस्य लक्षणम्।

जीवपुद्गलानां गतौ धर्मास्तिकायस्योपकारः। तेषा-मेव स्थितौ तावदधर्मास्तिकायस्योपकारः।

अवगाह्यमानपदार्थानामवगाहनलक्षणक्रियायामाका-शस्योपकारः।

शरीरवाङ्मनःप्राणापानद्वारा पुद्गलानामुपकारः।

---

१ यस्य समानजातीयद्रव्यान्तरं नास्ति तदद्रव्यं द्रव्यमुच्यते।

२ यस्य समानजातीयद्रव्यान्तरं समस्ति तदनेकद्रव्यं द्रव्यं कथ्यते, यथा जीव-पुद्गलौ।

तत्र शरीरमनसो लक्षणं कथितम् । भाषादीनां तु निगद्यते । तत्रापि भाषावाग्योगयोर्लक्षणद्वारा पार्थक्यं प्रदर्श्यते;—

भाषाप्रवर्त्तकत्वे सति जन्तुप्रयत्नविशेषरूपत्वं वाग्योगस्य लक्षणम् ।

भाषात्वेनापादितभाषार्हद्रव्यसन्ततिरूपत्वं लक्षणं भाषायाः ।

कौष्ठ्यप्रभवोच्छ्वासलक्षणो यो वायुस्तद्रूपत्वं प्राणस्य लक्षणम् । अत्र च लक्षणघटकोच्छ्वासस्यापि लक्षणमुच्यते—

उच्छ्वासत्वेनापादिता या द्रव्यसन्ततिस्तस्याः पुनर्व्यापारकरणशीलत्वमुच्छ्वासस्य लक्षणम् ।

अन्तः क्रियमाणो यो बाह्यवायुस्तस्य पुनर्निःश्वासरूपत्वमपानस्य लक्षणम् ।

सुखदुःखजीवितमरणद्वाराऽपि पुद्गलानामुपकारो भवति ।

सातावेदनीयोदयादात्मनः प्रसन्नतानुरूपत्वं सुखस्य लक्षणम् ।

असातावेदनीयोदयादात्मनः संक्लेशरूपत्वं लक्षणं दुःखस्य ।

आयुर्नामकर्मोदयात् प्राणस्याव्युपरमरूपत्वं जीवितस्य लक्षणम् ।

आयुर्नामकर्मोच्छेदात् प्राणस्य व्युपरमरूपत्वं मरणस्य लक्षणम्।

जीवस्य स्वस्वामिभावादिसंबन्धद्वारा परस्परमुपकारो भवति।

वर्तनापरिणामक्रियापरत्वापरत्वादिद्वारा कालस्योपकारो भवति।

सादिसान्तादिलक्षणस्थितौ येन केनचित् प्रकारेण द्रव्याणां यद्वर्त्तनं तद्रूपत्वं वर्तनाया लक्षणम्।

अथवा स्वयमेव वर्तनशीलानां पदार्थानां प्रयोजकत्वम्। अथवा प्रतिद्रव्यपर्यायमन्तर्णीतैकसमयस्वसत्तानुभूतिरूपत्वम्।

द्रव्याणां प्रयोगविस्रसाजन्यनूतनत्वपुरातनत्वादिरूपा या परिणतिस्तद्रूपत्वं परिणामस्य लक्षणम्। अथवा द्रव्यस्य स्वजात्यपरित्यागेन परिस्पन्देतरप्रयोगजन्यपर्यायस्वभावरूपत्वम्। अनवस्थितादिकार्थानां भूतत्व-वर्त्तमानत्व-भविष्यत्त्वविशिष्टचेष्टाविशेषरूपत्वं क्रियाया लक्षणम्।

पूर्वभावित्वं परस्य लक्षणम्।

पश्चाद्भावित्वमपरस्य लक्षणम्।

गतिस्त्रेधा, प्रयोगविस्रसामिश्रभेदात्।

जीवपरिणामसंप्रयुक्तशरीराहारवर्णगन्धरससंस्थानविषयकत्वं प्रयोगगतेर्लक्षणम्।

स्कन्धस्योत्पत्तिनिमित्तं भेदसंघातादयो भवन्ति। परमाणुनिमित्तं तु भेद एव।

स्नेहसौक्ष्म्यविगमे स्थितिक्षये च सति द्रव्यान्तरेण भेदे स्वभावगत्या द्व्यणुकादिस्कन्धभेदेनोपजायमानरूपत्वं भेदजन्याणोर्लक्षणम्।

पुनरपि स्कन्धो द्वेधा, चाक्षुषेतरभेदात्।

स्वत एव परिणतिविशेषरूपत्वे सति बादरत्वे च सति चाक्षुषपरिणामभाक्त्वे च सति भेदसंघाताभ्यां समुपजायमानत्वं चाक्षुषस्कन्धस्य लक्षणम्। अथवा भेदे सति अन्यसंघातान्तरसंयोगे सति सूक्ष्मपरिणामोपरमत्वे च सति स्थूलतया जायमानत्वम्।

पूर्वोक्ताद् विपरीतरूपत्वमचाक्षुषस्य लक्षणम्।

उत्पादव्ययध्रौव्ययुक्तत्वमित्यनेन पदार्थसामान्यस्य लक्षणमुक्तम्; तादृशलक्षणान्तरगतानामुत्पादादीनामपि लक्षणान्युक्तानि। अथवा लक्षणान्तरगतानां मध्ये ध्रौव्यस्य लक्षणं तु नित्यत्वलक्षणंकथनेनैव कथितम्। उत्पादव्यययोस्तु लोकप्रतीतत्वात् पूर्वं सामान्यत उक्तत्वाच्च विशेषतो नोच्यते। विशेषजिज्ञासायां तु किञ्चिदुच्यते, अर्पितानर्पितद्वाराप्युत्पादादीनां व्यवहारस्य सिद्धिर्भवति।

अनेकधर्मात्मकवस्तुनो विवक्षितेन केनचिद्धर्मेण प्रापितप्राधान्यरूपत्वमर्पितस्य लक्षणम्। अथवा किञ्चिद्वस्तु-

विशिष्टाभिधानार्पितत्वे सति सद्व्यवहारसाधकत्वम्। अथवा शब्दपरिप्रापितव्यवहाररूपत्वम् । मुख्यव्यवहाररूपत्वं वा ।

पूर्वोक्तलक्षणाद् विपरीतरूपत्वमनर्पितस्य लक्षणम् । अथवा गौणव्यववहाररूपत्वम् ।

अथ परस्परं विश्लिष्टानां परमाणूनां बन्धप्रतिपादनाय प्रकारः प्रदर्श्यते—

स्निग्धरूक्षत्वलक्षणगुणविशिष्टानां परमाणूनां बन्धो भवति । तत्र च स्निग्धरूक्षौ स्पर्शविशेषौ । अत्यल्पस्निग्धगुणयुक्तानां परमाणूनामत्यल्परूक्षगुणयुक्तपरमाणुभिः सह परस्परं बन्धो न भवति—एकगुणरूक्षाणां परमाणूनामेकगुणस्निग्धपरमाणुभिः सह बन्धो न भवतीत्यत्र तात्पर्यम् ।

एवं तुल्यगुणस्निग्धस्य तुल्यगुणस्निग्धेन सह, एवं तुल्यगुणरूक्षस्य तुल्यगुणरूक्षेण सहापि बन्धो न भवति। तथा च तुल्यगुणस्निग्धस्य तुल्यगुणस्निग्धेन सह बन्धो नास्ति । कुतः ? परस्परं परिणतरूपशक्त्यभावात्, तुल्यबलविशिष्टमल्लद्वयान्योन्याभिघातवत् । एवमेकगुणस्निग्धोऽपि नैकगुणस्निग्धैः सह बन्धमाप्नोति । तथा द्विगुणादिस्निग्धाः परमाणवो द्विगुणादिस्निग्धैः समगुणैरनन्तपर्यवसानैः स्निग्धगुणविशिष्टपरमाणुभिरपि न बध्यते । एवं रूक्षेपि ज्ञातव्यम् ।

गुणवैषम्ये सति सदृशानां गुणद्वयाधिकानां बन्धो भवति। बन्धे च सति समगुणस्य समगुणपरिणामो भवति। हीनस्य चाधिकगुणपरिणामो भवति।

तत्र परिणामो नाम भावान्तरापादकत्वं पारिणामिकस्य। तथा च स्वगतस्नेहगुणः कदाचिद् रूक्षतया परिणमति। एवं स्वगतरूक्षगुणः कदाचित् स्निग्धतया परिणमति। गुणसाम्ये तु सदृशानां प्रतिषेधः। इमौ तु विसदृशौ। एको द्विगुणस्निग्धोऽन्यो द्विगुणरूक्षः सन् परस्परं बन्धमाप्नोति। स्नेहरूक्षयोश्च भिन्नजातीयत्वान्नास्ति सादृश्यम्।

तत्र गुणानां लक्षणे तु —

द्रव्याश्रयत्वे सति निर्गुणत्वं गुणसामान्यस्य लक्षणम्। अयं भावः—स्थित्यंशो द्रव्यं, स एव आश्रयो येषां परिणामविशेषाणां गुणानां ते द्रव्याश्रयाः; अर्थात् परिणामविशेषगुणानां परिणतिकारणरूपं द्रव्यमुच्यते। एषु ज्ञानशुक्लादिगुणेषु नान्ये गुणाः सन्तीति निर्गुणास्ते गुणा भवन्तीति च द्रव्याद्व्यतिरेके सति तदुपपद्यते। गुणगुणिनोश्च भेदस्तु नास्त्येव सर्वथा, जैनमते सकलस्य वस्तुनो भेदाभेदरूपत्वात्।

यदा तु द्रव्यमेव तथा परिणतं ज्ञानाद्यारपन्ना तदा

१ द्विगुणाद्यधिकस्निग्धस्य द्विगुणाद्यधिकस्निग्धेन सह द्विगुणाद्यधिकरूक्षस्य च द्विगुणाद्यधिकरूक्षेण सह बन्धो भवतीत्यत्र तात्पर्यम्।

द्ध्यानाश्रयत्वमशुभयोगस्य लक्षणम् ।

पुनरपि स आश्रवो द्वेधा, सांपरायिकेर्यापथिकभेदात् । सकाषायिकत्रिविधयोगकृतकर्मागमनरूपत्वं सांपरायिकास्रवस्य लक्षणम् । अथवा संसारपरिभ्रान्तिकारणकत्वे सति यथासंभवं त्रिविधयोगकृतकर्मागमनरूपत्वम् ।

अकषायकृतत्वैकसमयस्थितिकत्वयोः सतोर्यथासंभवं त्रिविधयोगकृतकर्मागमनरूपत्वमैर्यापथिकास्रवस्य ।

अथ सांपरायिकाश्रवस्य भेदा उच्यन्ते । इन्द्रियकषायाव्रतक्रियाः सांपरायिकाश्रवस्य भेदाः । तत्रेन्द्रियाण्युक्तानि । कषायास्तु वक्ष्यमाणाः । इतरभेदास्तु उच्यन्ते । हिंसादीन्यव्रतानि सकलकर्मजालमूलानि । तत्प्रवृत्तौ आश्रवेषु प्रवृत्तिस्तन्निवृत्तौ तु निवृत्तिः । तेषां हिंसाद्यव्रतानां लक्षणं तु अग्रे वक्ष्ये ।

क्रियास्तु पञ्चविंशतिधा, सम्यक्त्वादिक्रियाभेदात् । सम्यक्त्वं चात्र शुद्धदलिकानुभवरूपं ज्ञेयम् ।

सा च प्रशम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्यलक्षणा जीवादिपदार्थविषया श्रद्धा जिनसिद्धगुरूपाध्याययतिजनयोग्यपुष्पधूप-प्रदीप-चामर-आतपत्र-नमस्करणादिवस्त्रपात्रान्नपानशय्यादानाद्यनेकविधवैयावृत्त्याभिव्यङ्ग्या सम्यक्त्वसद्भावसंवर्धनपदवीभूता सद्वेद्यबन्धहेतुभूता देवादिजन्मकारणरूपा सम्यक्त्वक्रिया। अतो विपरीता मिथ्याक्रिया ।

तासां लक्षणान्यपि प्रोच्यन्ते, जिनसिद्धगुर्वादीनां पूजानमस्कारवस्त्रपात्रादिप्रदानरूपवैयावृत्त्याभिव्यङ्ग्यत्वे सति सम्यक्त्वप्रवर्धकत्वं सम्यक्त्वक्रियाया लक्षणम् ।

तद्विपरीतप्रवृत्तिरूपत्वं मिथ्याक्रियाया लक्षणम् ।

योगत्रयकृतपुद्गलादानरूपत्वं समादानक्रियाया लक्षणम् । अथवा योगनिर्वृत्तिसमर्थपुद्गलग्रहणरूपत्वम् ।

तत्र धावनवल्गनादिरूपः कायव्यापारः । परुषाऽनृतादिरूपो वाग्व्यापारः । अभिद्रोहादिरूपो मनोव्यापारः ।

ईर्यापथकर्मकारणरूपत्वमीर्यापथिकक्रियाया लक्षणम् ।

गमनागमनादिचेष्टाविषयकप्रवृत्तिनिमित्तकत्वं प्रयोगक्रियाया लक्षणम् ।

सचित्तादिद्रव्येषु ममेति ममत्वकरणरूपत्वं परिग्रहक्रियाया लक्षणम् ।

दाम्भिकवृत्तितया मनोवाक्कायानां प्रवृत्तौ प्रेरकत्वं मायाप्रत्ययिकक्रियाया लक्षणम् ।

चारित्रमोहनीयोदये सति सावद्ययोगादिषु प्रवृत्तिरूपत्वमप्रत्याख्यानक्रियाया लक्षणम् ।

कायचेष्टाविशेषरूपत्वं कायिकक्रियाया लक्षणम् ।

खड्गादिनिर्वर्त्तनरूपत्वमधिकरणक्रियाया लक्षणम् ।

मात्सर्यकरणरूपत्वं प्राद्वेषिकक्रियाया लक्षणम् ।

दुःखोत्पादनरूपत्वं पारितापन्याः क्रियाया लक्षणम् ।

प्रमत्तयोगात् प्राणातिपातरूपत्वं प्राणातिपातक्रियाया लक्षणम् ।

अश्वादिचित्रकर्मक्रियादर्शनार्थं गमनरूपत्वं दार्ष्टिक्याः क्रियाया लक्षणम् ।

रागादिना जीवादीनां स्पृशतः पृच्छतो या क्रिया तत्करणरूपत्वं स्पर्शनप्रत्ययिकक्रियाया लक्षणम् ।

जीवादीनाश्रित्य या क्रिया तत्करणरूपत्वं प्रतीत्य-क्रियाया लक्षणम् ।

हर्षवशादश्वरथादिकं श्लाघयतो या क्रिया तत्करण-रूपत्वं सामन्तोपनिपातिक्याः क्रियाया लक्षणम् ।

स्वहस्तगृहीतजीवादिना जीवं मारयतो या क्रिया तत्करणरूपत्वं स्वाहस्तिक्याः क्रियाया लक्षणम् ।

यन्त्रादिना जीवाजीवादीन् निसृजतो या क्रिया तत्क-रणरूपत्वं नैसर्गिक्याः क्रियाया लक्षणम् । अथवा पापा-दानादिना प्रवृत्तिविशेषाभ्युपगमकरणरूपत्वम् ।

अन्याचरितपापानां प्रकाशनरूपत्वं विदारणक्रियाया लक्षणम् ।

आनयनं समुद्दिश्य स्वपरैः क्रियाकरणरूपत्वमानयन-क्रियाया लक्षणम् ।

जिनोक्तकर्त्तव्यविधिषु प्रमादवशतोऽनादररूपत्वम-नवकाङ्क्षक्रियाया लक्षणम् ।

अदृष्ट्वाऽप्रमृज्य च भूमौ वस्त्रपात्राद्यादाननिक्षेपादि-रूपत्वमनाभोगिकक्रियाया लक्षणम्।

अथवा उपयोगराहित्येन क्रियायां प्रवृत्तिकरणरूपत्वमनाभोगक्रियाया लक्षणम्।

छेदन-भेदन-ताडन-तर्जनादिकर्मविषयकप्रवृत्तिकरणरूपत्वमारम्भिकक्रियाया लक्षणम्।

उक्ता एकोनचत्वारिंशत् सांपरायिकास्रवाणां भेदाः। अथ तत्कर्म बध्नतां जीवानां परिणामतारतम्यवशत आश्रवतरतमताप्रदर्शनार्थमुच्यते। उपयोगपूर्वकप्राणातिपातादिप्रवृत्तिरूपज्ञातभावात्, अनुपयोगपूर्वकप्राणातिपातादौ प्रवृत्तिरूपाज्ञातभावात्, प्रकृष्टपरिणामरूपतीव्रभावात्, जघन्यपरिणामरूपमन्दभावात्, पराक्रमरूपवीर्यविशेषात्, शस्त्रादिरूपाऽधिकरणविशेषात्, साम्परायिकास्रवेषु विशेषो द्रष्टव्यः, तथा च प्रकृष्टकर्मबन्धजघन्यकर्मबन्धरूपपरिणामतारतम्योपयोगाऽनुपयोगपूर्वकप्राणातिपातादिप्रवृत्तिपराक्रमवीर्यविशेषशस्त्राद्यधिकरणविशेषैः सांपरायिकाश्रवेषु विशेषो द्रष्टव्यः।

प्रस्तुतसांपरायिककर्मबन्धस्य विशेषोऽधिकरणरूपाश्रवः। तीव्रादीनां च जीवादिविषयत्वात् जीवाजीवादीन् विषयीकृत्य सत्त्वाः तीव्रादिपरिणामेन प्रवर्त्तन्ते। ते च जीवाजीवास्तीव्रादिभावेन परिणन्तुरात्मनो विषयमुपेताः सांपरायिककर्मबन्धहेतवो भवन्ति।

तच्चाधिकरणं द्विविधम्, द्रव्याधिकरणभावाधिकरणभेदात्। तत्र द्रव्याधिकरणं दशधा, च्छेदन-दहन-मारण-उपघात-स्नेह-क्षाराम्लानुपयुक्तमनोवाक्कायलक्षणाधिकरणभेदात्।

तदेव च लक्षणद्वारा प्रतिपाद्यते—

प्राणिपादादीनां परश्वादिना च्छेदनकरणरूपत्वं छेदनाधिकरणस्य लक्षणम्।

सचेतनाऽचेतनानां वह्निना दाहकरणरूपत्वं दहनाऽधिकरणस्य लक्षणम्।

सचेतनानां विषादिप्रयोगेण मारणरूपत्वं मारणाधिकरणस्य लक्षणम्।

पृथिवीकायादीनामुपघातकरणरूपत्वमुपघाताधिकरणस्य लक्षणम्।

घृततैलादिस्नेहेन तेषामेवोपघातकरणरूपत्वं स्नेहाधिकरणस्य लक्षणम्।

क्षारेण सकलत्वग्मांसाद्यपकर्त्तनरूपत्वं क्षाराधिकरणस्य लक्षणम्।

आरनालाद्यम्लेन पृथिवीकायोपघातकरणरूपत्वमम्लाधिकरणस्य लक्षणम्।

अनुपयुक्तः सन् मनोवाक्कायादिना यां यां चेष्टां निर्वर्तयति तया तया कर्म बध्यत इत्येवंरूपत्वमनुपयुक्तमनोवाक्कायलक्षणाधिकरणस्य लक्षणम्।

उक्तं द्रव्याधिकरणं लक्षणविधानतः । अथ भावाधिकरणमुच्यते—

तत्र भावस्तीव्रादिरूपात्मपरिणामः स एवाधिकरणं भावाधिकरणम् । तच्चाष्टोत्तरशतभेदभिन्नं भवति, तथाहि, जीवाधिकरणं संक्षेपतस्त्रिविधं संरम्भसमारम्भारम्भभेदात् । लक्षणं तु तेषां निगद्यते.—

प्राणातिपातादिविषयकसंकल्पावेशरूपत्वं संरम्भस्य लक्षणम् ।

प्राणातिपातादिविषयकसाधनसान्निपातजनितपरितापनादिरूपत्वं समारम्भस्य लक्षणम् ।

प्राणातिपातादिरूपक्रियानिर्वृत्तिरूपत्वमारम्भस्य लक्षणम् ।

समारम्भादिरूपाधिकरणमपि प्रत्येकं त्रिविधम्, मनोवाक्कायभेदात्; तथा च मनःसंरम्भाधिकरणं वचःसंरम्भाधिकरणं कायसंरम्भाधिकरणम् । एवं समारम्भारम्भाधिकरणयोरपि ज्ञातव्यम् । इति नव भेदाः संजाताः । पुनरपि कृतकारिताऽनुमोदनभेदतो ये भेदा भवन्ति तेऽपि प्रतिपाद्यन्ते, तथाहि, कृतकायसंरम्भः, कारितकायसंरम्भः, अनुमोदितकायसंरम्भश्च । एवं वाङ्मनःसंरम्भयोरपि ।

इति संरम्भमादाय नवभेदाः, आरम्भमादायापि नव भेदाः, संकलने जाताः सप्तविंशतिः । तत्रापि क्रोधकृता-

स्तावन्तः, मानकृतास्तावन्तः, मायाकृतास्तावन्तः, लोभकृताश्च तावन्तः। इति सर्वसंकलने जाता अष्टोत्तरशतम्।

अधिकविचारणया तु अधिका अपि भवन्ति। तथाहि, अनन्तानुबन्धिकषायकृता अष्टोत्तरशतम्, एवमप्रत्याख्यानकृतास्तावन्तः, प्रत्याख्यानकृता अपि तावन्तः, संज्वलनकृता अपि तावन्तः; संकलने जाता द्वात्रिंशदुत्तरा चतुःशती। एवं स्वप्रतिष्ठितान्यप्रतिष्ठितोभयप्रतिष्ठिताऽप्रतिष्ठितभेदैः संकलने जाता अष्टाविंशत्युत्तरसप्तशताधिकसहस्रसङ्ख्याः। इति द्रव्यभावतो जीवाधिकरणं चिन्तितम्।

अथ क्रमप्राप्तमजीवाधिकरणं परामृश्यते—।

अजीवाधिकरणस्य मूलभेदाश्चत्वारः; निर्वर्तननिक्षेपसंयोगनिसर्गभेदात्। अजीवविषयकानिर्वर्तनादीन् कुर्वन् एष आत्मा सांपरायिकं कर्म बध्नाति।

तत्र निर्वर्तना द्विविधा, मूलोत्तरगुणनिर्वर्तनाभेदात्। तत्र मूलगुणनिर्वर्त्तनाधिकरणं पञ्चविधं शरीरं वाङ्मनःप्राणापानादिकं च। उत्तरनिर्वर्त्तनाधिकरणं काष्ठकर्मादिरूपम्। तच्च लक्षणतो निगद्यते—

औदारिकशरीरप्रायोग्यवर्गणाद्रव्यैर्निर्मापितं यदौदारिकसंस्थानं तत् प्रथमसमयादारभ्य मूलगुणनिर्वर्तनाधिकरणं भवति, कर्मबन्धनिमित्तत्वात्। तादृशौदारिकस्या-

ङ्गोपाङ्गकर्णवेधावयवसंस्थानादिकं तु मूलापेक्षयोत्तरगुण-निर्वर्त्तनाधिकरणं भवति ।

एवं वैक्रियशरीरप्रायोग्यवर्गणाद्रव्यैर्निर्मापितं यद् वैक्रियसंस्थानं तत् प्रथमसमयादारभ्य मूलगुणनिर्वर्त्त-नाधिकरणमात्मनो भवति, कर्मबन्धनिमित्तत्वात् । तस्यै-वाङ्गोपाङ्गकेशनखदन्तादिकमुत्तरगुणनिर्वर्त्तनाधिकरणं भ-वति मूलापेक्षया। आहारकशरीरप्रायोग्यवर्गणाद्रव्यैर्निर्मा-पितं यदाहारकसंस्थानं तत् प्रथमसमयादारभ्य मूलगुण-निर्वर्तनाधिकरणं भवति । तस्यैवाङ्गोपाङ्गादिकमुत्तरगुण-निर्वर्तनाधिकरणं भवति मूलापेक्षया । शीतोष्णपीतपावक-शक्तिभाजः शापानुग्रहकारिणः तैजसस्याऽपि तैजसशरी-रप्रायोग्यवर्गणाद्रव्यैर्निर्मापितं यत् तैजसशरीरसंस्थानं, तत् प्रथमसमयादारभ्य मूलगुणनिर्वर्तनाधिकरणं भवति ।

एवं कार्मणस्यापि ज्ञेयम् ।

एवं वाङ्मनोवर्गणाद्रव्यैर्निर्मापितं यद् वाङ्मनःसंस्थानं तदपि मूलगुणनिर्वर्तनाधिकरणं भवति, तथा प्राणापान-प्रायोग्यवर्गणाद्रव्यैर्निर्मापितोच्छ्वासनिःश्वासावपि मूल-गुणनिर्वर्तनाधिकरणं भवतः ।

कृत्रिमपुरुषादीनां निर्माणकरणरूपत्वं काष्ठकर्मरूपो-त्तरगुणनिर्वर्तनाधिकरणस्य लक्षणम् ।

एवं सूत्रचीवरकादिना ग्रथितकृत्रिमपुत्रकादिनिर्माण-

करणरूपत्वं पुस्तकर्मनिर्वर्तनाधिकरणस्य, चित्रकर्मकरणरूपत्वं चित्रकर्मनिर्वर्तनाधिकरणस्य च लक्षणम् ।

एवं लेप्यपत्रच्छेद्यजलकर्मभूमिकर्मादिशस्त्रकर्मादिनिर्वर्तनानां परिग्रहः कार्यः ।

अथ निक्षेपाधिकरणं प्रणिगद्यते । तदपि चतुर्विधम्, प्रत्यवेक्षितनिक्षेपाधिकरण-दुष्प्रमार्जितनिक्षेपाधिकरण-देशनिक्षेपाधिकरणा-ऽनाभोगिकनिक्षेपाधिकरणभेदात् ।

अप्रत्यवेक्षितभूप्रदेशे निक्षेप्य वस्त्रादिवस्तुनो निक्षेपकरणरूपत्वमप्रत्यवेक्षितनिक्षेपाधिकरणस्य लक्षणम् ।

दुष्प्रमार्जितभूप्रदेशे निक्षेप्य वस्त्रादिवस्तुनो दुष्प्रमार्जितरजोहरणेनाप्रमार्जितेन वा निक्षेपकरणरूपत्वं दुष्प्रमार्जितनिक्षेपाधिकरणस्य लक्षणम् ।

अप्रमार्जिते दुष्प्रमार्जिते वा देशे निक्षेप्य वस्तुनो निक्षेपकरणरूपत्वं देशनिक्षेपाधिकरणस्य लक्षणम् । तथा च एकतः सुप्रमार्जितमन्यतोऽप्रमार्जितं दुष्प्रमार्जितं वा सहसा शक्त्यभावाद् वा तत्र निक्षेपकरणं देशनिक्षेपाधिकरणम् ।

अनुपयोगपूर्वकप्रत्यवेक्षिते सुप्रमार्जिते वा देशे निक्षेप्य वस्तुनो निक्षेपकरणरूपत्वमनाभोगिकनिक्षेपाधिकरणस्य लक्षणम् ।

भूतव्रत्यनुकम्पादानसरागसंयमादियोगक्षान्तिशौचानि कुर्वाणो जीवः[१] सातावेदनीयं कर्म बध्नाति। आयुर्नामकर्मोदये सति भवन्ति भविष्यन्ति अभूवन्निति भूतानि एकेन्द्रियादिपञ्चेन्द्रियपर्यन्तानि।

व्रताभिसंबन्धरूपत्वं व्रतिनः परपीडामात्मीयां कुर्वाणस्यानुग्रहार्द्रीकृतान्तःकरणस्य चानु पश्चात् परकीयदुःखदर्शनानन्तरं हृदयकम्पनरूपत्वमनुकम्पायां लक्षणम्।

स्वपरानुग्रहार्थं स्वकीयस्य वस्तुनोऽतिसर्जनरूपत्वं दानस्य लक्षणम्।

संज्वलनलोभादिकषायो रागः, तत्सहवर्तित्वं सरागस्य लक्षणम्। पञ्चमहाव्रतत्वं संयमस्य लक्षणम्। सरागस्य संयमः सरागसंयमः। मूलोत्तरगुणसंपल्लोभाद्युभयभाज इति यावत्।

निरवद्यक्रियानुष्ठानरूपत्वं योगस्य लक्षणम्। सरागसंयमादीनां योगः सरागसंयमयोगः।

धर्मप्रणिधाने सति मनोवाक्कायैः क्रोधनिग्रहरूपत्वं, उदितक्रोधस्य कथंचिद् वैफल्यापादनरूपत्वं, क्रोधोदय-

---

१ अनुकम्पा द्विधा, भूतविषया, व्रतिविषया च। तत्र हृदयकम्पनरूपानुकम्पा भूतविषया, व्रतिविषया तु भक्तिरूपानुकम्पा ज्ञेया, अनुकम्पाशब्दस्यात्र भक्तिवाचित्वात्, पूर्वाचार्यैरपि तथैव प्रतिपादितत्वाच्च।

निरोधरूपत्वं वा क्षान्तेर्लक्षणम्।

लोभकषायरक्तात्मवाससः संतोषवारिणा विमलीकरणरूपत्वं शौचस्य लक्षणम्। तच्च शौचं द्विविधं, द्रव्यभावभेदात्।

स्नेहगन्धलेपोद्वर्तनापवर्तनप्राशुकजलादिना शरीरशुद्धिकरणरूपत्वं द्रव्यशौचस्य लक्षणम्।

अकुशलप्रवृत्तिनिरुद्धमनोवाक्कायस्य चरणतपोऽनुष्ठायिनश्च प्रायो निर्जराफलरूपत्वं भावशौचस्य लक्षणम्।

अन्येऽपि संयमासंयमबालतपोऽकामनिर्जराधर्मानुरागधर्मश्रवणशीलव्रतपोषधोपवासतपस्विम्लानवैयावृत्त्यानुष्ठानमातृपितृभक्तिसिद्धचैत्यनमनपूजाशुभपरिणामादयोऽपि सातावेदनीयस्याश्रवा भवन्ति।

अथ मोहनीयस्याश्रवः प्रतिपाद्यते; तच्च द्विविधः, दर्शनचारित्रमोहभेदात्। तत्रापि प्रथमतो दर्शनमोहस्याश्रवा उच्यन्ते—

केवलिश्रुतसङ्घधर्मदेवावर्णवादादिकं कुर्वाणो जीवो दर्शनमोहनीयं कर्म बध्नाति। अत्रापि सामान्यतोऽवर्णवादस्य लक्षणमुच्यते—

रागद्वेषमोहावेशाद् सद्भूते वस्तुनि दोषोद्भावनरूपत्वमवर्णवादस्य लक्षणम्।

कवलाहाराभावरूपत्व-दिगम्बरत्व-समवसरणभूम्यप-

कायाद्यारम्भानुमोदित्वदुष्करदुःखरूपमार्गोपदेशित्वादिकथनरूपत्वं केवल्यवर्णवादस्य लक्षणम् ।

अत्र च केवल्यवर्णवादघटककेवलित्वं लक्षणतो निगद्यते—

सकलज्ञानावरणक्षयसमुद्भूतसमस्तज्ञेयविषयकावबोधरूपत्वे सति साक्षादर्थपरिच्छेदिचेतनापर्यायरूपत्वं केवलस्य, तद्वत्त्वं च केवलिनो लक्षणम् ।

मांसभक्षणमद्यपानादीनामनवद्याभिधानरूपत्वम्, अविदग्धप्राकृतभाषानिबद्धादिकथनद्वारा जनसमुदायेष्वप्रीत्युत्पादकत्वम्, केवलिकवलाहाराभावादिकथनरूपत्वं वा श्रुतावर्णवादस्य लक्षणम् ।

अथ पूर्वोक्तमपि श्रुतावर्णवादघटकश्रुतस्य लक्षणमत्र विशेषत उच्यते—

तीर्थकरोपदिष्टत्वे सति बुद्ध्यतिशयवद्गणधरैरवधारितरूपत्वं श्रुतस्य लक्षणम् ।

तीर्थकरादिनामकर्मोदयवर्तितीर्थकरादिना प्रोक्तरूपत्वमङ्गाख्यश्रुतस्य लक्षणम् । तादृशाङ्गार्थानुवादित्वमुपाङ्गादीनां च ।

पञ्चाग्निकष्टासहिष्णुत्वगवाद्यपूजनादिरूपत्वं सङ्घावर्णवादस्य लक्षणम् ।

लोचादिकष्टकारिणो बाह्यशौचरहिता मागदत्तादा·

चारित्रमोहोदये सति आत्मनः कुटिलरूपत्वं तैर्यग्योनाश्रवस्य लक्षणम् ।

तथा च मिथ्यात्वावष्टम्भाधर्मदेशनापरिग्रहकूटकर्मनीलकापोतलेश्यापरिणामार्त्तध्यानोन्मार्गप्रज्ञापनमार्गनाशनसातिचारव्रतशीलतावसुधाराजितुल्यक्रोधादिकं कुर्वन् जीवस्तैर्यग्योनस्यायुर्बध्नाति ।

स्वभावमार्दवार्जवाल्पेच्छारम्भादिकरणरूपत्वं मानुषायुराश्रवस्य लक्षणम् ।

तथा च वालुकाराजिसदृशकषायतास्वभावमधुरतालोकयात्रोदासीनतादेवतागुरुपूजनशीलतातिथिसंविभागताकापोतादिलेश्यापरिणामधर्मध्यानादिकं कुर्वाणो जीवो मानुषायुर्बध्नाति ।

निःशीलव्रतरूपता सर्वेषां नारकतैर्यग्मानुषायुषामाश्रवकारणं भवति । अयं निष्कर्षः- निःशीलव्रतत्वं देवायुषः कारणं न भवति, शीलव्रतवतां देवेषूत्पादादित्यन्यत्रोक्तत्वात् ।

सरागसंयमसंयमासंयमाकामनिर्जरावालतपःशीलव्रतादीनां मध्येऽन्यतमकरणरूपत्वं देवायुराश्रवस्य लक्षणम् ।

संज्वलनलोभलक्षणरागसहवर्त्तित्वे सति सावद्ययोगविरतिरूपत्वं सरागसंयमस्य लक्षणम् ।

देशतः प्राणातिपातादिभ्यो निवृत्तिरूपत्वं संयमासं-

यमस्य लक्षणम् ।

भोगोपभोगादीनां निरोधेच्छाया अभावेऽपि पारतन्त्र्येणनिरोधकरणरूपत्वम्, अनुपयोगपूर्वकपापपुद्गलपरिशाटकरणरूपत्वं वा अकामनिर्जराया लक्षणम् ।

लोकोत्तरनिरवद्यक्रियानुष्ठानरहितत्वे सति लौकिकाभिमतक्रियानुष्ठानयुक्तत्वम्, मिथ्यात्वसहचरितरागद्वेषादियुक्तस्य जनस्य धर्माय पञ्चाग्न्यादिसेवनयागहिंसादिकरणरूपत्वं वा बालतपसो लक्षणम् ।

अथ बालतपसो भावार्थ उच्यते—बाला नाम मिथ्याज्ञानोपरक्ताशयाः शिशव इव हिताहितप्राप्तिविमुखास्तपोनुष्ठानजलानलप्रवेशगिरिशिखरभृगुपातादिकारकास्तापसादयस्तेषां तपो बालतपः, अज्ञानकष्टमिति ।

शीलव्रतत्वं नाम देशतः सर्वथा वा ब्रह्मचर्यपालनरूपत्वम्, परदाराणां तु सर्वथावर्जनरूपत्वम् ।

तथा च सरागसंयमादिकं कुर्वाणो जीवो देवायुर्बध्नाति ।

योगवक्रता-विसंवादनादिकं कुर्वाणो जीवोऽशुभनामकर्म बध्नाति ।

कायवाङ्मनोलक्षणयोगस्य कुटिलतया प्रवृत्तिरूपत्वं योगवक्रताया लक्षणम् ।

अन्यथा प्रतिपादनरूपत्वं विसंवादनस्य लक्षणम् ।

एतद्विपरीतं योगार्जवादि-संवादनादिकं कुर्वाणो

जीवः शुभनामकर्म बध्नाति ।

दर्शनविशुद्धिविनयसंपन्नताशीलव्रतविषयकानतिचारज्ञानोपयोगसंवेगयथाशक्तित्यागतपःसमाधिवैयावृत्त्यार्हदाचार्यबहुश्रुतप्रवचनभक्तिआवश्यकापरिहाणिमार्गप्रभावनाप्रवचनवत्सलत्वादिकं कुर्वाणो जीवस्तीर्थकरनामकर्म बध्नाति ।

जिनोक्ततत्त्वविषयकसम्यग्दर्शने निःशङ्कितत्वाद्यष्टाङ्गसेवनरूपत्वं दर्शनविशुद्धेर्लक्षणम् ।

सम्यग्ज्ञानादौ तद्वत्सु चाऽऽदरकरणरूपत्वे सति माननिवृत्तिकरणरूपत्वं विनयसंपन्नताया लक्षणम् ।

अयमर्थः, विनीयतेऽपनीयतेऽष्टप्रकारं कर्म येनासौ विनयः, तेन संपन्नो विनयसंपन्नः; तस्य भावो विनयसंपन्नता । स चतुर्धा, ज्ञानदर्शनचारित्रोपचारविनयभेदात् ।

कालाऽकालाऽध्ययनाऽनध्ययनबहुमानोपधानादिकरणरूपत्वं ज्ञानविनयस्य लक्षणम् ।

निःशङ्कनिष्काङ्क्षादिभवनरूपत्वं दर्शनविनयस्य लक्षणम् ।

समितिगुप्तिप्रधानाचरणरूपत्वं चारित्रविनयस्य लक्षणम् ।

अभ्युत्थानासनप्रदानाऽञ्जल्यादिकरणरूपत्वमुपचारविनयस्य लक्षणम् ।

णरूपत्वं, द्वेषबुद्ध्याऽन्यस्य दुःखोत्पादनरूपत्वं वा हिंसाया लक्षणम् ।

कषायादिप्रमादपरिणतात्मना सद्भूतनिह्नवाऽसद्भूतोद्भावनरूपत्वं, प्रमत्तयोगमाश्रित्य सद्भावप्रतिषेधरूपत्वे सति असद्भावोद्भावनरूपत्वं वाऽसत्यस्य लक्षणम् ।

तत्र सद्भावप्रतिषेधो नाम 'नास्ति जीवो' 'नास्ति परलोकः' इति प्रतिपादनरूपत्वम् ।

असद्भावोद्भावनं नाम श्यामातन्दुलमात्रोऽयमात्मा, अङ्गुष्ठपर्वमात्रो वा । तथा च शास्त्रप्रतिषिद्धनागनुष्ठानलक्षणगर्हाऽपि त्याज्या । तथाहि—हिंसायुक्तं वचः सद्भूतार्थप्रतीतिकार्यपि मृषा एव, अतो हिंसानिवृत्तिपरिरक्षणार्थं मृषानिवृत्तिरुपदिष्टा ।

परपरिगृहीतधनधान्यादीनामाक्रान्त्या चौर्यादिलक्षणशास्त्रप्रतिषिद्धनिषेधाचरणेन वा ग्रहणरूपत्वम्, कषायादिप्रमादकलुषितबुद्ध्या परकीयाऽदत्ततृणादिरूपद्रव्यजातस्यादानरूपत्वं वा स्तेयस्य लक्षणम् ।

कषायादिप्रमादपरिणतात्मनो मोहोदये सति चेतनाऽचेतनस्रोतसोरासेवनरूपत्वं, मोहोदयजनितरागपरिणामवशात् परस्परं स्वयमेव वाऽऽश्लेषजनितसुखमुपलभमानयोः स्त्रीपुंसोर्विलक्षणसंयोगविशेषरूपत्वं वा, उदितवेदयोः स्त्रीपुंसोः परस्परं स्वयमेव वा विलक्षणसंयोगपूर्वकशरीराश्लेषे सति रागपरिणामरूपत्वं वाऽब्रह्मणो लक्षणम् ।

सचित्ताचित्तमिश्रद्रव्येषु ममत्वलक्षणतृष्णारूपत्वं, प्रमत्तयोगमाश्रित्य बाह्याभ्यन्तरद्रव्येषु ममेति ममत्वभावलक्षणमूर्च्छारूपत्वं, प्रमत्तयोगानुवृत्तिसामर्थ्याद् बाह्याभ्यन्तरतृष्णारूपत्वं, बाह्याभ्यन्तरद्रव्यस्यार्जन-रक्षणसंस्कारादिव्यापारविषयकतृष्णारूपत्वं वा परिग्रहस्य लक्षणम्।

एवं चोक्तपञ्चाश्रवपरित्यागरूपत्वं विरतेर्लक्षणम्।

सा च विरतिर्द्वेधा, देश-सर्वविरतिभेदात्।

एवं मारयामीतिसंकल्पपूर्वकारम्भविषयकहिंसायाः परित्यागरूपत्वं देशतः प्राणातिपातविरतेर्लक्षणम्।

कूटसाक्षिदानादिरूपस्थूलमृषावादपरित्यागरूपत्वं देशतो मृषावादविरतेर्लक्षणम्।

परकीयपरिलघुतृणकाष्ठादिद्रव्याणां पतितविस्मृतादिरूपाणामनादानरूपत्वं देशतः स्तेयाविरतेर्लक्षणम्।

स्वदारसंतोषपूर्वकं परदाराणां विधवा-सधवा-वेश्या-कन्या-लक्षणानां सर्वथावर्जनरूपत्वं देशतोऽब्रह्मविरतेर्लक्षणम्।

धनधान्यादिकद्रव्याणां परिमाणकरणं देशतः परिग्रहविरतेर्लक्षणम्।

पूर्वोक्तहिंसाऽसत्यस्तेयाऽब्रह्मपरिग्रहलक्षणानां पञ्चानामाश्रवाणां सर्वथा वर्जनं सर्वविरतेर्लक्षणम्।

अथ च तेषामेव पञ्चानामाश्रवाणां सर्वथावर्जनरूपमहाव्रतानां स्थैर्यार्थमेकैकस्य व्रतस्य भावनापञ्चकं क्रमेण

प्रतिपाद्यते, तथाहि- ईर्यासमिति-मनोगुप्ति-एषणासमिति-आदाननिक्षेपणासमित्यालोकितपानान्नभोजनरूपाः प्रथमव्रतस्य पञ्च भावना भवन्ति ।

लोकातिवाहिते सूर्यांशुचुम्बिते मार्गे जन्तुरक्षणार्थमालोक्य सम्यग्गमनलक्षणप्रवृत्तिरूपत्वमीर्यासमितेर्लक्षणम् ।

आर्तरौद्रध्यानप्रचारनिरोधपूर्वकधर्मध्यानादिप्रचाररूपत्वं, समस्तकल्पनाजालविमुक्तिरूपत्वे सति समत्वप्रतिष्ठापूर्वकात्मरमणतारूपत्वं वा मनोगुप्तेर्लक्षणम् ।

द्विचत्वारिंशद्भिक्षादोषवर्जनपूर्वकान्नपानादीनां गवेषणरूपत्वमेषणासमितेर्लक्षणम् ।

औधिकौपग्राहिकोपध्योरादाननिक्षेपयोरागमानुसारेण प्रत्यवेक्षणप्रमार्जनलक्षणसम्यक्प्रवृत्तिरूपत्वमादाननिक्षेपणासमितेर्लक्षणम् ।

पात्रमध्ये गृहीतशुद्धपिण्डस्य चक्षुरादिना प्रत्यवेक्षणीयत्वे सति पुनः सांपातिकजीवसंरक्षणार्थं प्रतिश्रयमागत्य दिवा प्रकाशवत्प्रदेशे स्थित्वा सुप्रत्यवेक्षणपूर्वकं पानान्नभोजनलक्षणप्रवृत्तिरूपत्वमालोकितपानभोजनस्य लक्षणम् ।

अथ द्वितीयस्य भावनापञ्चकं निगद्यते;—

आलोचितभाषण-क्रोध-लोभ-भय-हास्य-प्रत्याख्यानलक्षणाश्च पञ्च भावना द्वितीयस्य भवन्ति ।

तृप्तिर्भवति । कार्याऽकार्यानपेक्षो भवति । परत्र चाशुभाङ्गोपाङ्गो लुब्धकोऽयमिति गर्हितवचनो भवति । ततो महाक्लेशकारणात् परिग्रहाद् व्युपरमः श्रेयान् ।

अथवा हिंसादिषु दुःखमेव केवलं भवतीति प्रतिपक्षभावनया भावनीयम् ।

तत्र दुःखं नामानिष्टसंयोगनिमित्तकं शरीरमनःपीडात्मकं व्यापत्तिपर्यवसानमिति । तच्च सत्त्वानामप्रियं वधबन्धनच्छेदनपाटनादिहेतुकं भवति । ततश्च हिंसादिषु दुःखमेव भवतीति फलितार्थः ।

किञ्च, तादृशमहाव्रतस्थैर्यार्थं मैत्रीप्रमोदकारुण्यमाध्यस्थ्यलक्षणाश्चतस्रो भावना अपि भावनीयाः ।

कृतकारितानुमतिविशिष्टयोगैरन्येषां बाधानुत्पत्तिविषयकचिन्तनरूपत्वं, 'केनापि पापं न कर्त्तव्यं, कोऽपि दुःखी मा भवतु, सर्वेषां च मुक्तिर्भवतु' इत्याकारचिन्तनरूपत्वं वा मैत्रीभावनाया लक्षणम् ।

सम्यग्ज्ञानतपोऽधिकसाधुजनेषु परात्मोभयकृतपूजाजनितसर्वेन्द्रियाभिव्यक्तमनःप्रहर्षलक्षणप्रमोदरूपत्वम्, सम्यग्ज्ञानादिगुणाधिकसाधुजनेषु प्रसन्नमुखादितयाऽभिव्यज्यमानान्तरिकभक्तिरागरूपत्वं वा प्रमोदभावनाया लक्षणम् ।

क्लिश्यमानेषु अनुग्रहात्मकपरिणामरूपत्वं कारुण्यभावनाया लक्षणम् ।

क्रूरकर्मलक्षणाऽविनीतेषूदासीनतालक्षणात्मपरिणामरूपत्वं माध्यस्थ्यस्य लक्षणम् ।

अपि च, जगत्स्वभावः संवेगार्थं भावनीयः, वैराग्यार्थं तु कायस्वभावः ।

उत्पादव्ययध्रौव्यात्मकत्वं, प्रियविप्रयोगेप्सिताऽलाभदारिद्र्यदौर्भाग्यदौर्मनस्यवन्धनाभियोगाऽसमाधिदुःखसंवेदनरूपत्वम्, 'चतसृषु गतिषु जीवा नानाविधदुःखं भुक्त्वा भुक्त्वा परिभ्राम्यन्ति' न च किञ्चिन्नियतमस्ति, जलबुद्बुदोपमं च जीवितम्, विद्युत्प्रकाशवच्चला विभूतिः' इत्यादिचिन्तनरूपत्वं वा जगत्स्वभावस्य लक्षणम् ।

संसारभीरुत्वादिचिन्तनरूपत्वं संवेगस्य लक्षणम् ।

तथा च जगत्स्वभावचिन्तनं संवेगाय भवति ।

अनित्यत्वाऽशुचित्वपूतिगन्धित्वनिःसारतादिचिन्तनरूपत्वं कायस्वभावस्य लक्षणम् ।

सांसारिकविषयवैमुख्यलब्धकषायोपशमस्य बाह्याभ्यन्तरोपधिषु अनभिष्वङ्गरूपत्वं, सांसारिकभोगविषयकमूर्च्छारहितत्वं वा वैराग्यस्य लक्षणम् ।

॥ इति निरूपिता भावना ॥

अथ च व्रतिलक्षणं कथ्यते—

निःशल्ययुक्तत्वे सति प्राणातिपातादिविरतियुक्तत्वं व्रतिनो लक्षणम् ।

अत्र च लक्षणघटकशल्यपदार्थो निगद्यते —

क्लेशज्वरस्वरूपवत्वे सति संयमस्वरूपभेदित्वं शल्यस्य लक्षणम् ।

तच्च शल्यं त्रिविधम्, मायानिदानमिथ्यादर्शनभेदात्। तत्र च मायाशल्यं प्रसिद्धमस्ति। निदानशल्यं तु निगद्यते—

चक्रवर्त्तिकेशवादीनां सौभाग्यादिगुणसंपदं विलोक्य भूरितपआचरितपरिखेदितमानसोऽध्यवस्यति, 'ममापि अमुष्य तपसः प्रभावादेवंविधा भोगा भवन्तु' इति चिन्तन-लक्षणनिदानकरणरूपत्वं, मौक्तिकसुखप्रतिबन्धपूर्वकसांसारिकसुखविषयकचिन्तनरूपत्वं वा निदानशल्यस्य लक्षणम् ।

तत्त्वार्थाऽश्रद्धानरूपत्वं मिथ्यादर्शनशल्यस्य लक्षणम्।

तदभाववत्त्वं निःशल्यस्य लक्षणम् ।

स च व्रती द्वेधा, अगारि-अनगारिभेदात्। तत्राऽगारो नाम वेश्म, तदुपलक्षितारम्भो वा ।

सम्यग्दर्शनसंपन्नत्वे सति अणुव्रतगुणव्रतशिक्षाव्रतानां मध्येऽन्यतमेन केनचित् सर्वेण वा युक्तत्वं, सम्यग्दर्शनसंपन्नत्वे सति स्थूलप्राणातिपातविरतिरूपत्वं, प्रतिपन्नसम्यक्त्वाणुव्रतत्वे सति यतिभ्यः सकाशात् साधुश्रावकाणां सामाचारीश्रवणशीलत्वं वा अगारिणो लक्षणम् ।

दीक्षादिवसादारभ्य तपश्चरणशीलत्वे सति सकल-

केवलागमगम्येषु अत्यन्तसूक्ष्मजिनोक्तपदार्थेषु संशयकरणरूपत्वं शङ्कातिचारस्य लक्षणम् ।

इहलौकिकपारलौकिकभोगोपभोगाविषयकाऽभिलाषारूपत्वमाकाङ्क्षातिचारस्य लक्षणम् ।

'इदमप्यस्ति किञ्चित्' इत्याकारकविभ्रमरूपत्वम्, 'इदमप्यस्तीदमपि' इत्याकारकमतिविप्लवरूपत्वं वा विचिकित्सातिचारस्य लक्षणम् ।

अभिगृहीतादिमिथ्यात्ववतां क्रियावाद्यादीनां प्रशंसाकरणम्, क्रियावाद्यादिपाखण्डिनां मनसा ज्ञानादिगुणप्रकर्षोद्भावनं वाऽन्यदृष्टिप्रशंसातिचारस्य लक्षणम् ।

तेषां पाखण्डिनां वचनद्वारा भूताभूतगुणोत्कीर्त्तनरूपत्वमन्यदृष्टिसंस्तवलक्षणातिचारस्य लक्षणम् ।

वधबन्धच्छेदादिकभारारोपणान्नपानादिनिरोधलक्षणाः पञ्चातिचाराः प्रथमाणुव्रतस्य भवन्ति ।

स्थावरादीनां वधकरणरूपत्वं वधलक्षणातिचारस्य लक्षणम् ।

त्रसानां बन्धनरूपत्वं बन्धलक्षणातिचारस्य लक्षणम् ।

वृक्षादीनां त्वक्छेदकरणरूपत्वं छेदलक्षणातिचारस्य लक्षणम् ।

पुरुषहस्त्यश्वगोमहीषादीनामधिकभारारोपणरूपत्वमधिकभारारोपणस्य लक्षणम् ।

तेषामेवांऽन्नपानादीनां प्रतिषेधकरणरूपत्वमन्नपान-निरोधलक्षणातिचारस्य लक्षणम्।

मिथ्योपदेशरहस्याभ्याख्यानसहसाभ्याख्यानकूट-लेखविश्वस्तमन्त्रभेदलक्षणाः पञ्चातिचारा द्वितीयाणुव्रतस्य भवन्ति।

पापजनकोपदेशकरणरूपत्वं, परेण स्वयं वाऽन्यस्याऽतिसंधानरूपत्वं वा मिथ्योपदेशस्य लक्षणम्।

गुह्यप्रकाशनरूपत्वं, रहस्येनासदध्यारोपणरूपत्वं वा रहस्याभ्याख्यानस्य लक्षणम्।

अनालोच्य 'चौरस्त्वम्, 'पारदारिकोऽयम्' इत्यसद्वचनरूपत्वं सहसाभ्याख्यानस्य लक्षणम्।

अन्यसदृशाक्षरमुद्राकरणरूपत्वं, परप्रयोगाधीनतयाऽन्येनाऽनुक्तस्यापि वचनस्य लेखकरणरूपत्वं वा कूटलेखस्य लक्षणम्।

विश्वासमुपगतानां जनानां विचारलक्षणमन्त्रस्य प्रकाशकरणं विश्वस्तमन्त्रभेदस्य लक्षणम्।

न्यासीकृतहिरण्यादीनामपलपनं न्यासापहारस्य लक्षणम्।

स्तेनप्रयोग-तदाहृतादान-विरुद्धराज्यातिक्रम-प्रतिरूपकव्यवहार-हीनाधिकमानोन्मानलक्षणाः पञ्चातिचारास्तृतीयाणुव्रतस्य भवन्ति।

चौर्यक्रियायां चौरस्य प्रेरणाकरणरूपत्वं स्तेनप्रयोगस्य लक्षणम् ।

चौरेणाहृतद्रव्यस्य मुधा क्रयेण वा ग्रहणं तदाहृतादानस्य लक्षणम् ।

राज्यमर्यादामुल्लङ्घ्याऽन्यप्रकारेणादानरूपत्वं विरुद्धराज्यातिक्रमस्य लक्षणम् ।

कुत्सितद्रव्यस्याऽपि सुवर्णरूप्यादिसदृशवर्णादियुक्तं कृत्वा लोके सुवर्णरूप्यादिव्यवहारकरणरूपत्वं, कृत्रिमसुवर्णादिकं निष्पाद्य लोके सत्यसुवर्णादिव्यवहारकरणरूपत्वं वा प्रतिरूपकव्यवहारस्य लक्षणम् ।

कूटतुलमानाभ्यां परप्रतारणार्थं कूटक्रयविक्रयलक्षणव्यवहारकरणरूपत्वं कूटक्रयविक्रयस्य लक्षणम् ।

अन्यविवाहकरणेत्वरगमनपरगृहीतागमनाऽनङ्गक्रीडातीव्रकामलक्षणाः पञ्चातिचाराश्चतुर्थव्रतस्य भवन्ति ।

स्वापत्यव्यतिरिक्तस्य कन्याफललिप्सया स्नेहसंबन्धेन वा विवाहकरणमन्यविवाहकरणस्य लक्षणम् ।

सातावेदनीय-चारित्रमोहनीयोदये सति अग्निदेवादिसाक्षिपूर्वकपाणिग्रहणरूपत्वं विवाहस्य लक्षणम् ।

प्रतिपुरुषगमनशीलायां साधारणस्त्रियां किञ्चित्कालं भाटिप्रदानादिना ग्रहणपूर्वकगमनरूपत्वमित्वरगमनस्य लक्षणम् ।

योनिप्रजननलक्षणस्थानं त्यक्त्वाऽन्यत्राऽनेकविध-

रस्य लक्षणम् । अत्रापि सावद्याहारविषयककृतप्रतिज्ञस्या-नाभोगादिना प्रवृत्तावतिचारः स्यात् ।

अर्द्धस्विन्न-यवमुद्गगोधूमादीनामनाभोगादिना भक्षणं दुष्पक्काहारस्य लक्षणम् । अनाभोगादिना प्रवृत्तावत्रातिचारः स्यात् ।

कन्दर्पकौकुच्यमौखर्यसंयुक्ताधिकरणोपभोगाधिकत्वाऽसमीक्ष्याधिकरणलक्षणाऽतिचारास्तृतीयगुणव्रतस्य भवन्ति।

रागोदये सति हास्ययुक्तासभ्यवाक्प्रयोगरूपत्वं कन्दर्पस्य लक्षणम् ।

मोहनीयोदये सति हास्ययुक्तासभ्यवाग्व्यापारोपार्जनपूर्वकासभ्यकायव्यापारकरणरूपत्वं कौकुच्यस्य लक्षणम् ।

असंबद्धप्रलापित्वं मौखर्यस्य लक्षणम् ।

उदूखलशकटधनूरूपाधिकरणान्तरेण सह मुसलफालयुगशराद्यधिकरणादीनां संयोगकरणं संयुक्ताधिकरणस्य लक्षणम् ।

यावत्स्नानालङ्कारादिभिर्यस्य प्रयोजनं ततोऽधिकग्रहणरूपत्वमुपभोगाधिक्यस्य लक्षणम् ।

अनालोच्याधिकरणमसमीक्ष्याधिकरणम् ।

कायवाङ्मनोदुष्प्रणिधानाऽनादरस्मृत्यनुपस्थानलक्षणाः पञ्चातिचाराः प्रथमशिक्षाव्रतस्य भवन्ति ।

शरीरावयवानां पाणिपादादीनामनभृततावस्थापनरूपत्वं कायदुष्प्रणिधानस्य लक्षणम् ।

वर्णसंस्काराभावे सति अर्थानवगमरूपत्वं वाग्दुष्प्रणिधानस्य लक्षणम् ।

क्रोधलोभद्रोहाऽभिमानादिकार्यव्यासङ्गजन्यसंभ्रमरूपत्वं मनोदुष्प्रणिधानस्य लक्षणम् ।

सामायिकविषयानुत्साहरूपत्वमनादरस्य लक्षणम् ।

सामायिकस्य स्मृतावनुपस्थापनरूपत्वं स्मृत्यनुपस्थापनस्य लक्षणम् ।

आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपलक्षणाः पञ्चातिचाराः देशावकाशिकस्य भवन्ति ।

संदेशकप्रदानादिना सचित्तादिवस्तूनामानयनमानयनप्रयोगस्य लक्षणम् ।

अभिगृहीतदेशव्यतिक्रमभयाद् भृत्यं प्रेष्य 'त्वया मम गवादिकमानेयम्' इति प्रेरणाकरणं प्रेष्यप्रयोगस्य लक्षणम् ।

स्वगृहभूप्रदेशविषयकाभिग्रहकृतानन्तरमुत्पन्नप्रयोजनेऽभ्युच्चकृवासितादिकरणेन प्रबोधनरूपत्वं शब्दानुपातस्य लक्षणम् ।

एवं रीत्या स्वकीयवर्णादिना प्रबोधनरूपत्वं स्वावयवप्रदर्शनद्वारा परागमनसूचकत्वं वा वर्णानुपातस्य लक्षणम् ।

कार्यार्थिना लोष्ठकाष्ठादिकं प्रक्षिप्य आगमनसूचकत्वं पुद्गलक्षेपस्य लक्षणम् ।

अप्रत्यवेक्षिताप्रमार्जितभूमावुत्सर्गादाननिक्षेपाः, अनादरस्मृत्यनुपस्थापने चेति पञ्चातिचाराः पोषधलक्षणतृतीयशिक्षाव्रतस्य भवन्ति ।

उच्चारप्रस्रवणखेलसिङ्घाणकादीनां प्रत्यवेक्षणप्रमार्जनाभाववद्भूमौ परित्यागरूपत्वमप्रत्यवेक्षितभूमावुत्सर्गलक्षणप्रथमातिचारस्य लक्षणम् ।

यष्टिपीठफलकपात्रकम्बलादीनां प्रत्यवेक्षणप्रमार्जनमकृत्वा भूमौ ग्रहणनिक्षेपकरणरूपत्वमप्रत्यवेक्षितभूमौ ग्रहणलक्षणातिचारस्य लक्षणम् ।

दर्भकुशकम्बलवस्त्रादिलक्षणसंस्तारकस्य प्रत्यवेक्षण प्रमार्जनमकृत्वा भूमौ निक्षेपकरणरूपत्वं तृतीयातिचारस्य लक्षणम् ।

पौषधेऽनुत्साहकरणमनादरलक्षणचतुर्थातिचारस्य लक्षणम् ।

पौषधोपवासविषयकप्रतिपत्तिरूपकर्त्तव्यक्रियायां स्मृतिभ्रंशरूपत्वं स्मृत्यनुपस्थापनलक्षणपञ्चमातिचारस्य लक्षणम् ।

सचित्तनिक्षेप-सचित्तपिधान-परव्यपदेश-मात्सर्य-कालातिक्रमलक्षणाः पञ्चातिचारा अतिथिसंविभागस्य भवन्ति ।

चतुर्थोऽधिकारः ।

अभिहितो लक्षणविधानाभ्यां कायवाङ्मनःकर्मयोग-लक्षण आश्रवः । अधुना बन्धः प्रतिपाद्यते—

मिथ्यादर्शनाविरतिकषाययोगा इति पञ्च बन्धहेतवो भवन्ति ।

तत्र मिथ्यात्वं नाम तत्त्वार्थाश्रद्धानलक्षणं सम्यग्दर्शनविपरीतरूपमुक्तमेव ।

मत्यज्ञानादिना परिकल्पयतोऽसम्यग्दर्शनपरिग्रह-विषयको योऽयं 'तदेव सत्यम्' इत्यभ्युपगमः, तत्प्रातिपत्त्या गृहीतमिथ्यात्वरूपत्वं, मत्यज्ञानादिनाऽभ्युपेत्यासम्यग्दर्शनविषयकपरिग्रहरूपत्वं वाऽभिगृहीतमिथ्यात्वस्य लक्षणम् ।

तादृग्मिथ्यात्वं येषां सन्तीति मिथ्यात्विनः । ते च त्रिषष्ट्युत्तरशतत्रयसंख्याका भवन्ति । तथाहि—सप्तषष्टिरज्ञानवादिनां सुगतशिष्यप्रभृतीनां भेदाः सन्ति । साकल्य-वष्कुल-सात्यमुग्रि-चारायण-माध्यन्दिन-मौद-पिप्पलाद-वादरायण-जैमिनि-वसुप्रभृतयोऽपि ज्ञातव्याः ।

क्रियावादिनामशीत्युत्तरशतभेदाः । ते च मरीचिकुमारकपिलोलूकगार्ग्यप्रभृतयः ।

चतुरशीतिभेदा अक्रियावादिनाम् । ते च कौकलकाण्ठेविद्धि-कौशिकप्रभृतयः ।

द्वात्रिंशद्भेदा विनयवादिनाम्। ते च वशिष्ठ-पाराशर-जातुकर्ण-वाल्मीक-रोमहर्ष-सत्यदत्त-व्यास-इलापुत्रप्रभृतयः।

अभिगृहीतमिथ्यात्वादन्यद् यन्मिथ्यात्वं तदनभिगृहीतादिकम्। तदपि तत्त्वार्थाश्रद्धानरूपं भवति।

पूर्वोक्तविरतिलक्षणाद् विपरीतरूपत्वमविरतेर्लक्षणम्।

संसारप्राप्तिनिमित्तरूपत्वं कषायस्य लक्षणम्।

योगस्तु पञ्चदशविधः प्रमादोऽपि। अत्र यद्यपेक्षितः, तर्हि सोऽपि उच्यते। लक्षणतो यदि कषायादिष्वन्तर्भूतः, तर्हि तेषां लक्षणकथनेन सोऽपि संगृहीतो भवति।

स्मृत्यनवस्थाने सति कुशलेष्वनादररूपत्वे च सति योगदुष्प्रणिधानरूपत्वं प्रमादस्य लक्षणम्। तस्य च प्रमादस्य पञ्च प्रकाराः सन्ति मद्य-विषय-कषाय-विकथा-निद्रारूपाः। एषां मिथ्यादर्शनादीनां बन्धहेतूनां पूर्वेषां सद्भावे सति उत्तरेषां नियतभावः। उत्तरोत्तरसद्भावे तु पूर्वेषां भजना अनियतभाव इत्यर्थः।

अथ बन्धहेतुप्रतिपादितं श्रुत्वा पर उत्कर्णायते-हस्ताद्यभावे सति आदानशक्तिविरहात् कथममूर्तस्यात्मनः कर्मग्रहणं प्रति व्यापारः? । उच्यते, इयमेव तावदस्थानारेका

१ कष्यन्ते-पीड्यन्ते प्राणिनः परस्परं यस्मिन्नसौ कषः संसारः, तमयन्ते प्राप्नुवन्ति जन्तवोऽनेनेति कषायः क्रोध-मान-माया-लोभरूपः।

जैनप्रक्रियानभिज्ञस्य देवानांप्रियस्य, केनात्मनोऽमूर्तताभ्युपेता ? कर्मजीवसंबन्धस्याऽनादित्वादेकत्वपरिणामे सति क्षीरोदकवद् वह्न्ययोगोलकवद् वा मूर्त एवात्मा, कार्मणशरीरसंबन्धात् कर्मग्रहणे व्याप्रियते। अतो नास्ति शङ्काकरणसमयः। सकषायत्वलक्षणहेतुना जीवः कर्मणो योग्यान् पुद्गलान् गृह्णाति।

स्यादेतत्, पूर्वं सामान्यबन्धहेतुग्रहणे कषायोऽपि गृहीत एव, पुनः किमर्थं गृह्यते ? इति शङ्कायां समाधीयते–

बन्धहेतौ कषायाणां प्राधान्यख्यापनार्थं पुनः कषायपदमुपात्तम्। अथवा, कषायेषु सत्सु तीव्रमन्दमध्यमाशयानुरूपस्थित्यनुभागो भवतीतिं विशेषप्रतिपत्त्यर्थं पुनः कषायपदं गृहीतम्।

बन्धनं बन्धः, कर्मयोग्यपुद्गलानां परस्परमाश्लेषः, अथवा प्रकृत्यादिना बध्यते अस्वातन्त्र्यमापद्यते आत्मा स बन्धः पुद्गलपरिणामः क्षीरोदकवत्। स चात्मप्रदेशेषु रागाद्यभ्यञ्जनेषु कर्मयोग्यपुद्गलानामाश्लेषमात्रत्वेन यो बन्धः स एव बन्धपदार्थः। तथा च मिथ्यात्वादिबन्धहेतुवशादार्द्रीकृतचेतसः सर्वतो योगविशेषात् सूक्ष्मैकक्षेत्रावगाह्यनन्तप्रदेशानां कर्मयोग्यानां वर्गणानामुपश्लेषरूपत्वं बन्धसामान्यस्य लक्षणम्।

रागादिस्नेहाभ्यञ्जनस्यात्मनोऽपूर्वकर्मग्रहणयोग्यताधारकत्वं कार्मणशरीरपरिणामस्य लक्षणम्।

तथा च आत्मशरीरयोः कथञ्चिदैक्यादनाभोगवीर्यतः कर्मबन्धो भवति। स एव कार्मणशरीरपुद्गलग्रहणकृतो बन्धश्चतुर्विधः।

लक्षणतः प्रतिपादितो बन्धः, संप्रति विधानत उच्यते—

उक्तलक्षणो बन्ध एकोऽपि कार्यभेदात् प्रकृत्यादिविभागमासादयति। यथा मनुष्यः क्रौर्यनीचैस्त्वादिलक्षणकार्यभेदान्नानात्वं प्रतिपद्यते। स च द्वेधा, द्रव्यभावभेदात्। तत्र द्रव्यबन्धस्तृणकाष्ठादिषु प्रसिद्धः। भावबन्धस्तु निगद्यते—

भावबन्धश्चतुर्विधः, प्रकृति-स्थित्यनुभाग-प्रदेशबन्धभेदात्।

अनाभोगपूर्वकाध्यवसायविशेषे सति आहारपरिणामवत् स्थित्यादिलक्षणकर्मपरिणतिरूपत्वं प्रकृतिबन्धस्य लक्षणम्। स च कर्मात्मनोरैक्यतापादनस्वरूपः।

कर्त्रा परिगृहीतपूर्वोक्तकर्मपुद्गलराशेरात्मप्रदेशेष्ववस्थानविशेषरूपत्वं स्थितिबन्धस्य लक्षणम्।

कालान्तराऽवस्थाने सति विपाकवर्तिपरिणामविशेषरूपत्वं, प्रयोगकर्मणोपात्तानां शुभाशुभकर्मप्रकृतीनां प्रकृतिस्थितिरूपाणां तीव्रमन्दाद्यनुभावतयाऽनुभवरूपत्वं वा अनुभागबन्धस्य लक्षणम्।

स चानुभागबन्धः समासादितपरिपाकावस्थस्य बद-

रादेरिवोपभोग्यसर्वघात्यघात्येकद्वित्रिचतुःस्थानिकशुभाशुभतीव्रमन्दादिभेदेन वक्ष्यमाणस्वरूपः ।

स्वप्रदेशेषु कर्मपुद्गलसंचयकरणरूपत्वं, यथोक्तनिमित्तसद्भावे सति पुद्गलादानरूपत्वं वा प्रदेशबन्धस्य लक्षणम् ।

अत्र च मोदकदृष्टान्तः परिभावनीयः । तथाहि—प्रकृतयो द्वेधा, मूलोत्तरभेदात् । मूला ज्ञानावरणादिरूपा, उत्तरास्तु मतिज्ञानावरणादिरूपाः । तेषां कालविशेषनियमनं स्थितिः, तस्या एव स्निग्धमधुरत्वाद्येकद्विगुणादिसद्भावोऽनुभागः । पुनस्तस्या एव कणिकादिवद् द्रव्यपरिणामः प्रदेशः, अर्थात् कर्मणः पुद्गलपरिणामनिरूपणं प्रदेशबन्धः । तथा च प्रत्येकात्मप्रदेशाः कर्मावयवैरनन्तानन्तकैर्बद्धाः सन्तः कर्माणि बध्नन्ति सातत्ययोगेन ।

तत्र च प्रकृत्यादिचतुर्विधबन्धेषु प्रथमभेदः प्रथमतया निरूप्यते—

मूलोत्तरभेदात् प्रकृतिबन्धो द्वेधा, तत्रापि मूलप्रकृतिभेदस्त्वष्टविधः, ज्ञान-दर्शनावरण-वेदनीय-मोहनीयायुर्नामगोत्रा-ऽन्तरायभेदात् ।

उत्तरप्रकृतिभेदस्तु सप्तनवतिविधः, अथवा अष्टपञ्चाशदुत्तरशतविधः ।

तथाहि—ज्ञानावरणः पञ्चविधः, मतिश्रुतावधिमनःपर्यायकेवलभेदात् । दर्शनावरणो नवविधः, चक्षुर-

चक्षुरवधिकेवलदर्शन-निद्रा-निद्रानिद्रा-प्रचला-प्रचलाप्रचला-स्त्यानर्द्धिभेदात् । एवं रीत्योत्तरोत्तरं वक्ष्यते ।

अथ च प्रथमतः क्रमप्राप्तं पञ्चविधं ज्ञानावरणं प्रतिपाद्यते—

सामान्यविशेषात्मकवस्तुनो विशेषावबोधरूपत्वं ज्ञानस्य लक्षणम् ।

तच्च ज्ञस्वभावस्यात्मनः प्रकाशरूपस्य ज्ञानावरणक्षयोपशमक्षयसमुद्भवः प्रकाशविशेषो मतिज्ञानादिव्यपदेशभाग् भवति । तस्यावारकं कर्म ज्ञानावरणनामधेयं भवति ।

अष्टाविंशतिभेदभिन्नं मतिज्ञानं येनाऽऽव्रियते तन्मतिज्ञानावरणं देशघाति, लोचनपटवत् ।

श्रोत्रोपलब्धिरूपश्रुतज्ञानं येनाऽऽव्रियते तच्छ्रुतज्ञानावरणम्, तदपि देशघाति भवति ।

इन्द्रियाऽनिन्द्रियनिरपेक्षत्वे सति आत्मनोऽवधिज्ञानावरणक्षयोपशमजन्यपुद्गलविषयकप्रकाशाविर्भावरूपमवधिज्ञानं येनाऽऽव्रियते तदवधिज्ञानावरणम्; तदपि देशघाति ।

साक्षादात्मनो मनोद्रव्यपर्यायान् निमित्तीकृत्य मनुष्यक्षेत्राभ्यन्तरवर्तिसंज्ञिपञ्चेन्द्रियमनोग्राहिप्रकाशविशेषरूपं मनःपर्यायज्ञानं येनाऽऽव्रियते तन्मनःपर्यायज्ञानावरणम्, तदपि देशघाति ।

केवलज्ञानावरणक्षयसमुद्भूतमात्मप्रकाशस्वरूपं केवलज्ञानं येनाऽऽव्रियते तत्केवलज्ञानावरणम्, तच्च सर्वघाति भवति।

अथ दर्शनावरणं प्रतिपाद्यते—

पश्यत्यनेनात्मेति चक्षुः सर्वमेवेन्द्रियमात्मनः सामान्यविशेषबोधस्वभावस्य करणं तद्द्वारकं यत्सामान्यमात्रोपलम्भनमात्मपरिणतिरूपं चक्षुर्दर्शनम्, तद्घाति चक्षुर्दर्शनावरणम्, तच्च देशघाति भवति।

शेषेन्द्रियमनोविषयकमविशिष्टमचक्षुर्दर्शनं, तद्घाति कर्माचक्षुर्दर्शनावरणम्। तच्च वेत्रिसमं भवति।

अवधिदर्शनावरणक्षयोपशमसमुद्भूतमवधिदर्शनम्। साक्षादात्मनः सामान्यमात्रोपलम्भनं केवलदर्शनावरणक्षयसमुद्भूतं केवलदर्शनम्। तयोरावारकं कर्मावधिदर्शनावरणं केवलदर्शनावरणं च भवति।

सुखप्रबोधस्वभावावस्थाविशेषरूपत्वं, सुखजागरणस्वभावस्वापावस्थाविशेषरूपत्वं वा निद्राया लक्षणम्।

दुःखजागरणस्वभावस्वापावस्थाविशेषरूपत्वं, दुःखप्रतिबोधस्वापावस्थाविशेषरूपत्वं वा निद्रानिद्राया लक्षणम्।

स्थितापस्थितस्वापावस्थाविशेषरूपत्वं प्रचलाया लक्षणम्।

चंक्रमणविषयकस्वापावस्थाविशेषरूपत्वं प्रचलाप्रचलाया लक्षणम्।

दिनचिन्तितार्थातिकाङ्क्षाविषयकस्वापावस्थाविशेष-रूपत्वम्, जाग्रदवस्थाध्यवसितार्थसंसाधनविषयकाभि-काङ्क्षानिमित्तकस्वापाऽवस्थाविशेषरूपत्वं वा स्त्यानर्द्धेर्ल-क्षणम् ।

अत्र निद्रादयस्तु समधिगताया दर्शनलब्धेरुपघाते प्रवर्त्तन्ते ।

चक्षुर्दर्शनावरणादिचतुष्टयं तु दर्शनोद्गमोच्छेदित्वाद् मूलघातं निर्वहन्ति ।

वेदनीयं द्विविधं, सदसद्वेदनीयभेदात् ।

मोहनीयं मूलतो द्विविधं, दर्शनचारित्रमोहनीयभेदात् ।

तत्र दर्शनमोहनीयं त्रिविधम्, सम्यक्त्व-मिश्र-मिथ्या-त्वमोहनीयभेदात् ।

तत्र तत्त्वार्थश्रद्धानरूपं सम्यक्त्वम् । तत्त्वार्थाश्रद्धा-नरूपं मिथ्यात्वम् । तदुभयस्वभावं मिश्रम् ।

चारित्रमोहनीयं द्विविधम्, कषायमोहनीयनोकषायमोह-नीयभेदात् ।

तत्र कषायमोहनीयं चतुर्विधम्, अनन्तानुबन्ध्यप्रत्या-ख्यान-प्रत्याख्यान-संज्वलनभेदात् ।

तदपि प्रत्येकं चतुर्विधं, क्रोध-मान-माया-लोभभेदात् ।

सम्यक्त्वलक्षणात्मीयगुणप्रतिबन्धकत्वे सति संसारा-ऽनुबन्धनशीलत्वम्, अनन्तसंसारकारणत्वे सति मिथ्या-

त्वानुबन्धशीलत्वं वा अनन्तानुबन्धिकषायमोहनीयस्य लक्षणम् ।

यस्योदये सति अल्पमपि प्रत्याख्यानं न भवति तद्रूपत्वम्, देशविरतिप्रतिबन्धकत्वं वाऽप्रत्याख्यानकषायमोहनीयस्य लक्षणम् ।

सर्वविरतिलक्षणमूलगुणप्रतिबन्धकत्वं प्रत्याख्यानकषायमोहनीयस्य लक्षणम् ।

यथाख्यातचारित्रप्रतिबन्धशीलत्वं, समस्तपापस्थानरहितविरतिभाजोऽपि यतेर्दुःपहपरिषहसन्निपाते सति युगपत्संज्वलनशीलत्वं वा संज्वलनकषायस्य लक्षणम् ।

पर्वतराजिसदृशोऽनन्तानुबन्धी क्रोधः । तत्र पर्वतः पाषाणपुञ्जः, तदेकदेशोऽपि शिलादिविभागरूप उपचारात् पर्वत उच्यते । तस्य राजिर्नामभेदः, पर्वतस्य राजिः पर्वतराजिस्तया सदृशः पर्वतराजिसदृशः, सादृश्यं तु वक्ष्यमाणरीत्या ज्ञेयम्;-शिलायामुत्पन्ना या राजिः, सा च यावच्छिलारूपं तावदवतिष्ठते, न तस्याः संधानमस्ति, एवमनन्तानुबन्धी क्रोध उत्पन्नः सन् यावज्जीवति तावदनुवर्तते, न च तस्योपशान्तिरस्ति । तदनु मृत्वा च भूयो नरकगमनं भवति ।

तथा भूमिराजिसदृशोऽप्रत्याख्यानक्रोधः ।

---

१ अल्पप्रत्याख्यानमप्रत्याख्यानं, देशविरतिरित्यर्थः, तत्प्रतिबन्धको द्वितीयः कषायः ।

थदुःखोत्पत्तिस्थानेषु विवसनं भवति तद्रूपत्वं तिर्यगायुषो लक्षणम् ।

यस्योदये सति प्रायेण शारीरिकमानसिकसुखदुःखनिबन्धनमनुष्येषूत्पत्तिः स्यात् तद्रूपत्वं मनुष्यायुषो लक्षणम् ।

यस्योदये सति प्रायेण सुखप्रचुरदेवेषु जन्म भवति तद्रूपत्वं देवायुषो लक्षणम् ।

॥ निरूपिताऽऽयुष्कर्मप्रकृतिः ॥

संप्रति नामकर्म निरूप्यते—

तच्च नामकर्म त्र्यधिकशतविधं, गति-जातिशरीराङ्गोपाङ्ग-बन्धन-संघातन-संस्थान-संहनन-स्पर्श-रस-गन्ध-वर्णानुपूर्वी-विहायोगति-पराघातो-च्छ्वासातपोद्योतागुरुलघु-तीर्थङ्करनिर्माणो-पघात-त्रस-बादर-पर्याप्त-प्रत्येक-स्थिर-शुभ-सुभग-सुस्वरादेययशःकीर्ति-स्थावर-सूक्ष्मापर्याप्त-साधारणास्थिराशुभ-दुर्भगदुःस्वरानादेयाऽयशःकीर्तिभेदात् ।

तत्र गतिश्चतुर्धा, नरक-तिर्यग्-मनुष्य-देवगतिभेदात् ।

जातिः पञ्चधा, एकद्वित्रिचतुष्पञ्चेन्द्रियभेदात् ।

शरीरं पञ्चधा, औदारिक-वैक्रिया-ऽऽहारक-तैजस-कार्मणभेदात् ।

बन्धनं पञ्चदशविधम्, औदारिकौदारिकबन्धनौ-दारिकतैजसबन्धनौ-दारिककार्मणबन्धन-वैक्रियवैक्रियबन्धन-

वैक्रियतैजसबन्धन-वैक्रियकार्मणबन्धना-ऽऽहारकाहारकबन्धना-ऽऽहारकतैजसबन्धना-ऽऽहारककार्मणबन्धनौ-दारिकतैजसकार्मणबन्धन-वैक्रियतैजसकार्मणबन्धना-ऽऽहारकतैजसकार्मणबन्धन-तैजसतैजसबन्धन-तैजसकार्मणबन्धन-कार्मणकार्मणबन्धनभेदात् ।

संघातनं पञ्चधा, औदारिक-वैक्रिया-हारक-तैजस-कार्मणसंघातनभेदात् ।

संस्थानं षोढा, समचतुरस्र-न्यग्रोध-सादि-वामन-कुब्ज-हुण्डकसंस्थानभेदात् ।

संहननं षोढा, वज्रर्षभनाराच-ऋषभनाराच-नाराचा-ऽर्धनाराच-कीलिका-सेवार्तसंहननभेदात् ।

स्पर्शोऽष्टधा, मृदु-खर-गुरु-लघु-शीतोष्ण-स्निग्ध-रूक्ष-भेदात् ।

रसः पञ्चधा, तिक्त-कटु-कषाया-ऽम्ल-मधुरभेदात् ।

गन्धो द्विविधः, सुरभि-दुरभिगन्धभेदात् ।

वर्णः पञ्चधा, कृष्ण-नील-लोहित-हारिद्र-शुक्लवर्ण-भेदात् ।

आनुपूर्वी चतुर्धा, नरक-तिर्यग्-मनुष्य-देवानुपूर्वी-भेदात् ।

विहायोगतिर्द्वेधा, शुभाऽशुभविहायोगतिभेदात् ।

अथ लक्षणतो नामकर्म प्रतिपाद्यते—

यस्योदये सति विवक्षितभवाद् भवान्तरे जीवानां गमनं स्यात् तद्रूपत्वं गतिनामकर्मणो लक्षणम् ।

यस्योदये सति नरकगमनरूपत्वं तन्नरकगतिनामकर्मणो लक्षणम् ।

यस्योदये सति तिर्यग्गतिगमनरूपत्वं तत्तिर्यग्गतिनामकर्मणो लक्षणम् ।

यस्योदये सति मनुष्यगतिगमनरूपत्वं तन्मनुष्यगतिनामकर्मणो लक्षणम् ।

यस्योदये सति देवगतिगमनरूपत्वं तद्देवगतिनामकर्मणो लक्षणम् ।

यस्योदये सति एकेन्द्रियादिजातिव्यवहारभाक् स्यात् तद्रूपत्वम्, एकेन्द्रियादिसंज्ञाव्यपदेशनिमित्तकत्वम्, नारकादिगतिषु अव्यभिचारिसादृश्येनैकीभूतार्थात्मिका या जातिस्तद्व्यपदेशभाग्निमित्तकत्वं वा एकेन्द्रियादिजातिनामकर्मणो लक्षणम् ।

यस्योदये सति चेतनस्य निवासस्थानरूपशरीरनिष्पत्तिः स्यात् तद्रूपत्वं शरीरनामकर्मणो लक्षणम् ।

सारस्थूलपुद्गलद्रव्यवर्गणानिर्मापितरूपत्वमौदारिकशरीरस्य लक्षणम् ।

तत्प्रायोग्यपुद्गलग्रहणनिमित्तकत्वं तन्नामकर्मणो लक्षणम् ।

यामकं 'अनेनाङ्गोपाङ्गेनात्रैव विनिवेष्टव्यम्' इत्येवरूपं नियमकारि आनुपूर्वीनामकर्म ।

लब्धिशिक्षर्द्धिनिमित्तकत्वे सति आकाशगमननिमित्तकत्वम्, आकाशविषयकगमननिमित्तकत्वं वा विहायोगतिनामकर्मणो लक्षणम् ।

तच्च द्वेधा, शुभाशुभभेदात् ।

तत्र प्रशस्ता गतिर्हंसगजादीनाम्, अप्रशस्तोष्ट्रशृगालादीनाम् ।

लब्धिर्देवादीनां देवयोन्युत्पन्नाविनाभाविनी, शिक्षया ऋद्धिः शिक्षर्द्धिः, तपस्विनां प्रवचनमधीयानानां विद्याद्यावर्त्तनप्रभावाद् वा । तथा च लब्धिशिक्षर्द्धिजन्यत्वे सति आकाशगमनभूतत्वं विहायोगतिनामकर्मणो लक्षणमिति फलितार्थः ।

परं प्रति त्रासप्रतिघातादिजनकत्वं, दर्शनमात्रेण सभ्यानां क्षोभापादकरूपत्रासजनकत्वे सति परप्रतिभाप्रतिघातजनकत्वं वा पराघातनामकर्मणो लक्षणम् ।

प्राणापानयोग्यपुद्गलादानसामर्थ्यजनकत्वम्, यन्निमित्तकोच्छ्वासनिःश्वासौ भवतस्तद्रूपत्वं वोच्छ्वासनामकर्मणो लक्षणम् ।

लक्षणघटकप्राणापानौ प्रागुक्तावपि विशेषप्रतिपत्त्यर्थमुच्येते—

ऊर्ध्वगामिसमीरणरूपत्वं प्राणस्य लक्षणम् ।

अधोगामिसमीरणरूपत्वमपानस्य लक्षणम्।

प्राणापानौ चानन्तप्रदेशपुद्गलस्कन्धपरिणामजन्यौ।

आतपशक्तिजननसामर्थ्यनिमित्तकत्वमातपनामकर्मणो लक्षणम्। अथवा, यस्योदये सति स्वयं शीतस्वभावा अपि परान् तापयन्ति तद्रूपत्वम्। तच्च सूर्यमण्डलवर्तिबादरपृथिवीकायेषु एव विपच्यते, नान्यत्र।

अनुष्णप्रकाशसामर्थ्यजनकत्वमुद्द्योतस्य लक्षणम्। तच्च खद्योतादिषु ज्ञेयं, न सूर्यमण्डलाग्न्यादौ।

अगुरुलघुपरिणामनियामकत्वमगुरुलघुनामकर्मणो लक्षणम्।

भावार्थ उच्यते—यस्य कर्मण उदयात् कुन्थ्वादीनां सर्वजीवानामात्मीयशरीराणि न गुरूणि, नापि लघूनि च; किन्तु अगुरुलघुपरिणाममेवाऽवरुन्धन्ति तत्कर्माऽगुरुलघुशब्देनोच्यते। निश्चयनयापेक्षया सर्वद्रव्याणि स्थित्यादिस्वभावेन परिणमन्त इति जैनसिद्धान्तः।

तत्र अगुरुलघ्वाख्यो यः परिणामस्तस्य नियामकं तदेव तत्रोद्भूततरशक्तिकं निधत्त इत्यगुरुलघु नाम। सर्वशरीराणि च निश्चयनयाश्रयाद् न गुरुलघ्वादिव्यपदेशभाञ्जि। व्यवहारनयाश्रये तु अन्योन्यापेक्षया त्रैविध्यमनुरुध्यन्ते।

यस्योदये सति त्रिभुवनस्यापि पूज्यो भवति तद्रूपत्वं तीर्थकृन्नामकर्मणो लक्षणम्। तच्च कैवल्यावस्थायां विपच्यते।

सर्वजीवानामात्मीयशरीरावयवानां विन्यासनियमनिमित्तकत्वं निर्माणनामकर्मणो लक्षणम्, प्रासादादिनिर्माणकलाकौशलोपेतवर्धकीवत् ।

शरीराङ्गोपाङ्गानां यस्योदये सति अनेकधोपघातः क्रियते तद्रूपत्वं, स्वशरीरावयवलम्बिकादिभिः स्वावयवानां विघातो यन्निमित्तको भवति तद्रूपत्वम्, स्वकीयपराक्रमाद्युपघातजनकत्वम्, यस्योदये सति स्वपरकृताद्बन्धनाद्युपघातो भवति तद्रूपत्वं वोपघातनामकर्मणो लक्षणम् ।

द्वीन्द्रियादित्रसभावनिर्वर्तकत्वम्, यस्योदये सति द्वीन्द्रियादिषूत्पत्तिर्भवति तद्रूपत्वं वा त्रसनामकर्मणो लक्षणम् ।

यस्योदये सति जीवानां स्थूलत्वलक्षणबादरत्वं स्यात् तद्रूपत्वं, स्थूलस्वरूपबादरशरीरनिर्वर्तकत्वं वा बादरनामकर्मणो लक्षणम् ।

यन्निमित्तकाहारादिवर्गणाद्रव्याणामादानपरिणामयोः शक्तिरुत्पन्ना तद्रूपत्वं पर्याप्तनामकर्मणो लक्षणम् ।

सा च षोढा, आहार-शरीरे-न्द्रिय-श्वासोच्छ्वास-भाषा-मनःपर्याप्तिभेदात् ।

शरीरेन्द्रियवाङ्मनःप्राणापानयोग्यवर्गणादलिकद्रव्याहरणक्रियापरिसमाप्तिरूपत्वमाहारपर्याप्तेर्लक्षणम् ।

निजोचितगृहीताहारवर्गणाद्रव्याणां पृथक् खलरसरूपेण परिणतिर्यन्निमित्ता भवति तद्रूपत्वम्, रसीभूताहारस्य शरीरयोग्या परिणतिर्यन्निमित्ता भवति तद्रूपत्वम्,

कथितो मूलप्रकृतिबन्धः। अधुना स्थितिबन्धो निरूप्यते।

स्थितिरवस्थानं बन्धकादारभ्य यावदशेषं निर्जीयते तावत्पर्यन्ता। लक्षणं तु प्रागुक्तमेव।

अधुना प्रत्येककर्मप्रकृतीनां स्थितिः प्रतिपाद्यते—

ज्ञान-दर्शनावरण-वेदनीया-ऽन्तरायलक्षणप्रकृतीनां त्रिंशत्सागरोपमकोटाकोटिलक्षणा परा स्थितिः।

नामगोत्रप्रकृतीनां विंशतिसागरोपमकोटाकोटिलक्षणा परा स्थितिः।

आयुषस्त्रयस्त्रिंशत्सागरोपमलक्षणा परा स्थितिः।

जघन्या वेदनीयस्य द्वादशमुहूर्ता। अन्तर्मुहूर्ताऽपि मतान्तरे।

शेषाणां ज्ञान-दर्शनावरण-मोहनीया-ऽऽयुष्का-ऽन्तरायाणामन्तर्मुहूर्ता जघन्या स्थितिः।

उक्तः स्थितिबन्धः। अधुनाऽनुभागबन्धः प्रतिपाद्यते-

अनुभागो नाम विपाकः, विविधं पचनं विपाकः, उदयावलिकायां कर्मदलिकानां प्रवेशः, अथवा कर्मणां विशिष्टो नानाप्रकारो वा पाको विपाकः।

अप्रशस्तपरिणामानां तीव्रता, शुभपरिणामानां मन्दता। यथोक्तकर्मविशेषाऽनुभवनं सर्वासां कर्मप्रकृतीनां फलम्। विपाकोदयानुभवनं बन्धादारभ्याबाधाकालं मुक्त्वा जीवस्यानुसमयं कर्मानुभवनम्।

तद्यथा—ज्ञानावरणस्य फलं ज्ञानावरोधः । दर्शनावरणस्य दर्शनशक्त्यवरोध इत्यादि ।

यथा येनाऽध्यवसायविशेषेण यादृशरूपं बद्धं कर्म तत्तथा तेनैव प्रकारेण विपच्यते, अन्यप्रकारेणाऽपि ।

विपाको रसः, स च तीव्रमन्दमध्यमाद्यवस्थाभेदभिन्नः।

तत्र कदाचिच्छुभमपि अशुभतयाऽनुभूयते, अशुभं च शुभरसतयेति । स चानुभावसंज्ञो रसस्तीव्रादिभेद्भिन्नोऽनेकप्रकारकः कर्माणि भवति । तत्र च किञ्चित् कर्म पुद्गलेषु विपच्यते, पुद्गलान् परिणमयति नानाप्रकारेणेत्यर्थः, तत्पुद्गलविपाकीत्युच्यते ।

किञ्चित् कर्म भवविपाकि भवति, प्राप्तजन्मनः शरीरवदात्मनि विपच्यते, अपरं तु क्षेत्रविपाकि क्षेत्रान्तरे विपच्यते, अन्यत् किञ्चिज्जीवविपाकि जीव एव विपच्यते ।

ज्ञानावरणादीनां सप्रभेदानां प्रत्येकमन्वर्थनिर्देशः कृतः।

यदि विपाकोऽनुभाव इति कथ्यते तर्हि तत् कर्मानुभूतं सत् किमावरणवदवतिष्ठते उत निःसारं सत् प्रच्यवते ? इति शङ्कायां समाधीयते । तस्माद् विपाकलक्षणानुभवात् कर्मणो निर्जरणं भवति, आत्मप्रदेशेभ्यः प्रतिपतनं भवतीत्यर्थः । निर्जरा क्षयो वेदनेति पर्यायाः। तत्र निर्जरा हानिः, क्षयो विनाशः, कर्मपरिणतेर्विगमो वेदना, रसानुभव आकर्मफलोपभोगपरिसमाप्तेः ।

सा च निर्जरा द्वेधा, विपाकजेतरभेदात्। तत्र विपाकजा संसारसमुद्रे परिभ्राम्यमाणस्यात्मनः शुभाशुभकर्मणो विपाककालप्राप्तस्य यथायथमुदयावलिकास्रोतसि पतितस्य फलोपभोगादुपजातस्थितिक्षये सति या निवृत्तिः सा विपाकजा निर्जरा भवति।

यत्कर्माऽप्राप्तविपाककालमौपक्रमिकक्रियाविशेषसामर्थ्यादनुदीर्णमपि बलादुदीर्योदयावलिकायामनुप्रविश्यते, पनसातिन्दुकाम्रफलपाकवत्, सा तु अविपाकजा निर्जरा भवति। तां तु 'तपसो निर्जरा भवति' इति व्याख्यानाऽवसरे प्रतिपादयिष्यामि।

उक्तोऽनुभागबन्धः। अथ प्रदेशबन्धो निगद्यते।

नामप्रत्ययाः सर्वतो योगविशेषात् सूक्ष्मैकक्षेत्राऽवगाढस्थिताः सर्वात्मप्रदेशेषु अनन्ताऽनन्तप्रदेशाः। व्याख्यात्वस्य नामप्रत्ययाः पुद्गला ज्ञानावरणादिविघ्नपर्यवसानं नाम तस्य प्रत्ययाः कारणानि मिथ्यादर्शनादीनि सर्वतः तिर्यगूर्ध्वमधश्च बध्यन्ते। कायवाङ्मनोलक्षणयोगविशेषाच्च सूक्ष्माश्च बध्यन्ते, न तु बादराः। अत्र च सूक्ष्मत्वमापेक्षिकम्। तथाहि-परमाणोरारभ्य यावदनन्तप्रदेशाः स्कन्धास्तावदपि अतिसूक्ष्मत्वान्न बन्धयोग्या भवन्ति। अनन्तप्रदेशवर्गणायामपि केचिद् ग्रहणयोग्याः, केचिच्च न, अतः सूक्ष्मग्रहणम्। एवं क्रमेणौदारिक-वैक्रिय-आहारक-तैजस-भाषा-प्राणापानमनोवर्गणां समुल्लङ्घ्य कर्मवर्ग-

णायोग्याः सूक्ष्मपरिणतिरूपा एव बध्यन्ते, न बादरपरिणतिभाजः। एवं क्रमेणाऽपि सूक्ष्मपरिणतिभाजः केचिद्ग्रहणयोग्याः, केचिच्च न।

यत्रावकाशे जीवावगाढस्तत्रैव ये कर्मयोग्याः पुद्गलास्त एव बध्यन्ते न क्षेत्रान्तरावगाढाः। तत्र वर्तमानास्ते च स्नेहगुणयोगादात्मनि लगन्ति, न क्षेत्रान्तरावगाढाः, तद्भावपरिणामाऽभावात्। तेऽपि पुद्गलाः स्थिता एव बध्यन्ते, न गतिसमापन्नाः। गतिं प्राप्तास्तु गच्छन्त्येव, परिणामविशेषाद्ध नात्मनि श्लिष्यन्ते, वेगवत्त्वात्। सर्वप्रकृतिपुद्गलाः सर्वात्मप्रदेशेषु बध्यन्ते।

एकैको ह्यात्मप्रदेशोऽनन्तानन्तकर्मप्रदेशैः बद्धोऽसंख्यप्रदेशात्मकजीवस्यैकैकप्रदेशोऽनन्तानन्तज्ञानावरणकर्मस्कन्धैर्बद्धः।

एवं दर्शनावरणादिकर्मस्कन्धैरपि अनन्ताऽनन्तप्रदेशाः कर्मग्रहणयोग्याः पुद्गला बध्यन्ते।

अयं फलितार्थः—आत्मन एकैकप्रदेशे ज्ञानावरणादिपुद्गला अनन्ताऽनन्तप्रदेशाः स्कन्धाः कर्मवर्गणायोग्या बध्यन्ते—श्लेषमुपयान्ति, अयोग्यास्तु न बध्यन्ते।

प्रदेशबन्ध उक्तः।

अथ प्रसङ्गात् पुण्यप्रकृतिरपि प्रतिपाद्यते—

सद्वेद्यसम्यक्त्वहास्यरतिपुरुषवेदशुभायुर्नामगोत्रलक्षणाः पुण्यप्रकृतयः। तत्र सद्वेद्यं भूतव्रत्यनुकम्पादिहेतुकम्।

तथाहि-भूतव्रत्यनुकम्पादानं सरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य कारणानि ।

सम्यक्त्वं तत्त्वार्थश्रद्धानलक्षणम् । तदपि केवलिश्रुतसङ्घदेवानामवर्णवादनिषेधपूर्वकवर्णवादादिहेतुकम् ।

वर्णवादस्तु सद्भूतगुणोद्भावनं पूजापर्युपासनं, त एव हेतवो यस्य तद्धेतुकम् ।

हास्यवेदनीयं हास्याकारेणानुभवनीयम् ।

रतिवेदनीयं रत्याकारेणानुभवनीयम् ।

पुरुषवेदनीयं पुरुषवेदरूपेणानुभवनीयम् ।

शुभायुर्मानुषदेवायुर्लक्षणमिति भाष्यकाराभिप्रायः । कर्मप्रकृतिग्रन्थानुसारिणस्तु तिर्यगायुरपि शुभमाचक्षते ।

शुभगोत्रमुच्चैर्गोत्रं शुभनाम गतिजातिनामादीनां मध्यादुद्वर्तितव्यम् ।

सद्वेद्यादिकमष्टविधं पुण्यसंज्ञितं कथितम् । तथा चार्थलभ्यं पापं व्युदसनीयम् ।

यद्यपि कथिता पुण्यप्रकृतिः, तथापि प्रकारान्तरेण स्पष्टतया द्वाचत्वारिंशदुच्यन्ते—

सद्वेद्यं तिर्यग्मनुष्यदेवायूंषि मनुष्यदेवगती पञ्चेन्द्रियजातिः शरीराणि पञ्च समचतुस्रसंस्थानं वज्रर्षभनाराचसंहननमङ्गोपाङ्गत्रयं प्रशस्तवर्णगन्धरसस्पर्शा मनुष्यदेवानुपूर्व्यौ अगुरुलघूपघाते उच्छ्वास-आतपोद्द्योत-प्रशस्त-

विहायोगतित्रसबादरपर्याप्तिप्रत्येकस्थिरशुभसुभगसुस्वरा-
देययशःकीर्तिपर्यवसानाः शुभा निर्माणतीर्थंकरोच्चैर्गोत्रैः
सहेति पूर्वप्रकृतिविपरीतभूताः पापप्रकृतय इति कथितो
बन्धाधिकारः ।

इति ए-एम्-ए-इस्-वीत्युपाधियुक्त-शास्त्रविशारद–जैनाचार्य–श्रीमद्वि-
जयधर्मसूरीश्वरचरणारविन्दभृङ्गायमाणेन न्यायतीर्थ-न्यायविशार-
दोपाधियुक्तेन प्रवर्त्तकमङ्गलविजयेन विरचिते जैनतत्त्व-
प्रदीपाख्ये ग्रन्थे बन्धतत्त्ववर्णननामा
चतुर्थोऽधिकारः समाप्तिं यातः ॥

पञ्चमोऽधिकारः ।

अथापूर्वपुद्गलादानोच्छेदनिमित्तभूतसंवरतत्त्वं लक्षणविधानाभ्यां प्रतिपाद्यते—

आश्रवनिरोधनिमित्तकत्वं संवरस्य लक्षणम् ।

स द्वेधा, द्रव्यभावभेदात् ।

कर्मपुद्गलादानोच्छेदपरिमाणरूपत्वं द्रव्यसंवरस्य लक्षणम् ।

भवहेतुक्रियात्यागलक्षणपरिणामरूपत्वं भावसंवरस्य लक्षणम् ।

तत्राश्रवः कर्मप्रदेशविचयाः शुभाशुभलक्षणाः कायादयस्त्रय इन्द्रियकषायाव्रतक्रियाः पञ्चचतुष्पञ्चपञ्चविंशतिसंख्याकाः, तेषां निरोधो निवारणं संवरः स्मृतः ।

कर्मोपादनहेतुभूतपरिणामाभावरूपत्वमिति फलितलक्षणं संवरस्य ।

स च पुनर्द्वेधा, सर्वदेशभेदात् ।

तत्र सूक्ष्मबादरयोगनिरोधकाले सर्वसंवरः, शेषकाले चारित्रप्रतिपत्तेरारभ्य देशसंवरपरिणतिभागात्मा भवति ।

अयं भावः– सामायिकादिचारित्रवतां परिस्पन्दवत्त्वेसत्यपि विदिततत्त्वानां संसारसमुद्रं तरीतुमभिवाञ्छतां प्रधानसंवराभावेऽपि न्यस्तसमस्तप्रमादस्थानानां देशसंवरः खलु समस्त्येवेति प्रतिपादनाय प्रोच्यते—

स च संवरो गुप्ति-समिति-धर्मा-नुप्रेक्षा-परिषह-जय-चारित्रलक्षणोपायैर्भवतीति तेषां स्वरूपं प्रतिपाद्यते—

रागद्वेषपरिणतिजन्यार्त्तरौद्रध्यानाध्यवसायाद् मनो-निवृत्त्यपरित्यक्तैहिकामुष्मिकविषयाभिलाषस्य मनोगुप्त-त्वादेव कर्म निरुध्यते।

सम्यग्दर्शनज्ञानपूर्वकात्त्रिविधयोगस्य शास्त्रोक्तविधि-ना स्वाधीनमार्गव्यवस्थापनरूपत्वं गुप्तिसामान्यस्य लक्षणम्।

सा च त्रेधा, मनोवाक्कायगुप्तिभेदात्।

समस्तकल्पनाजालपरित्यागपूर्वकत्वे सति समत्वे * सुप्रतिष्ठितस्य मनसः यदात्मरमणतारूपत्वं, कुशला-कुशलसंकल्पनिरोधरूपत्वं वा मनोगुप्तेर्लक्षणम्।

वाचनप्रच्छनप्रश्नव्याकरणादिष्वपि सर्वथा वाग्निरो-धरूपत्वं, सर्वथा भाषानिरोधरूपत्वं वा वाग्गुप्तेर्लक्षणम्।

शयनासननिक्षेपस्थानचङ्क्रमणादिषु कायचेष्टानिय-मरूपत्वं कायगुप्तेर्लक्षणम्।

---

*तत्र कुशलसंकल्पाऽनुष्ठानं सरागसंयमादिलक्षणं, अकुशलं तद्विपरीतरूपम्, कुशले सरागसंयमादौ प्रवृत्तेः सद्भावेऽपि अकु-शले संसारहेतावभावादेव मनोगुप्तिः। योगनिरोधावस्थायां तु सर्व-थाभावादेव मनोगुप्तिः, तत्काले सर्वकर्मक्षयार्थ एवात्मनः परिणामो भवति।

इति प्रतिपादिता गुप्तिः। अथ समितिस्वरूपं प्रतिपाद्यते—

सम्यक्प्रवृत्तिरूपत्वं समितेर्लक्षणम्।

सा च पञ्चधा, भाषैषणादाननिक्षेपोत्सर्गसमितिभेदात्।

संयमार्थमवश्यतया सूर्यालोके सति सर्वतो युगमात्रनिरीक्षणायुक्तस्य जीवरक्षार्थं शनैश्चरणयोर्न्यासरूपत्वमीर्यासमितेर्लक्षणम्।

हितमितासंदिग्धानवद्यार्थविषयकानियमितभाषणरूपत्वम्, निरवद्यार्थभाषणत्वे सति सत्यासत्यामृषालक्षणयोर्भाषयोर्द्वयोः सूत्रानुसारिणोर्भाषणरूपत्वं वा भाषासमितेर्लक्षणम्।

अन्नपानरजोहरणपात्रचीवरादिधर्मसाधनानां प्रतिश्रयस्य चोद्गमोत्पादनैषणादोषवर्जनपूर्वकगवेषणरूपत्वमेषणासमितेर्लक्षणम्।

रजोहरणपात्रचीवरपीठफलकदण्डकादीनां निरीक्षणप्रमार्जनपूर्वकग्रहणनिक्षेपकरणरूपत्वम्, रजोहरणादिधर्मोपकरणानामवश्यतया निरीक्ष्य प्रमृज्य च ग्रहणनिक्षेपकरणरूपत्वं वा आदाननिक्षेपणासमितेर्लक्षणम्।

जन्तुवर्जितभूमौ निरीक्ष्य प्रमृज्य च मूत्रपुरीषादीनां परित्यागकरणरूपत्वमुत्सर्गसमितेर्लक्षणम्।

समुद्रे परित्रायको नास्तीतिचिन्तानुरूपत्वं वाऽशरणभावनाया लक्षणम्।

रागद्वेषाऽनुभावस्वरूपसंसारे चक्रवज्जन्मजरामरणादिरूपेण भ्रमणानुचिन्तनरूपत्वं, रागद्वेषमोहाभिभूतैर्जन्तुभिरन्योन्याभिघातवधबन्धाक्रोशजनितानि दुःखानि प्राप्यन्ते, अहो! कष्टरूपः खलु संसारः, इति चिन्तनारूपत्वं वा संसारभावनाया लक्षणम्।

एवं चिन्तयतः संसारभयं भवति, तस्मान्निर्वेदः, निर्विण्णश्च संसारपरिहाणाय घटते।

एकाकिपरिभोक्तृत्वरूपेण जन्मजरामरणादिक्लेशाऽनुचिन्तनरूपत्वम्, एक एवाहं न मे कश्चित् स्वकीयः परकीयो वा विद्यते, एक एव जाये, म्रिये वेति चिन्तनारूपत्वं वा एकत्वभावनाया लक्षणम्।

शरीरादिभ्योऽपि आत्मनो भेदानुचिन्तनरूपत्वम्, अन्योऽहम्, अन्यच्छरीरमिति शरीरात्मनोर्भेदानुचिन्तनरूपत्वं वा अन्यत्वभावनाया लक्षणम्।

आद्युत्तरकारणाऽशुचित्वा-ऽशुचिभाजनत्वा-ऽशुचिपरिणामपाकाऽनुबन्धस्वरूपाऽशुचित्वादिरूपं खलु शरीरमिति चिन्तनाऽनुरूपत्वमशुचिभावनाया लक्षणम्।

अयं भावः- शरीरस्याद्यं कारणं शुक्रशोणितरूपं, तच्चाऽत्यन्ताशुचिरूपं भवति। तथा कवलाहारादिर्ग्रस्तमात्र

एव श्लेष्मप्रायो भवति, श्लेष्मणा द्रवीकृतोऽत्यन्ताऽशुचिर्भवति, ततः पित्ताशयं प्राप्य पच्यमानोऽम्लीभूतो भवति, ततो वायुना विभक्तः पृथग् रसरूपः खलीभूतस्याऽशुचिरूपो भवतीत्यादिरीत्योत्तरकारणस्याऽशुचित्वादशुचिभूतमेव शरीरमिति। शरीरकर्णनासादि खलु अशुचिभाजनम्, कललार्बुदपेशीघनव्यूहसंपूर्णगर्भकौमारयौवनादिजननरूपाऽशुभपरिणामस्य मलादीनामुद्भवरूपपरिणामस्य चाशुचित्वादशुचीभूतमेव शरीरम्। पाकेनानुबन्धाद् दुर्गन्धिस्वभावं दुरन्तं भवति, तस्मादशुचिभूतमेव शरीरम्।

मनोवाक्कायलक्षणयोगाः शुभाशुभकर्म यस्मादाश्रवन्ति स आश्रवः। ततश्च श्रोत्रादीन्द्रियविषयप्रसक्तहरिणादिवद् विनिपातमपि गच्छतीति चिन्तनानुरूपत्वम्, कायिकादियोगादिभ्यः शुभाशुभकर्मागमनानुचिन्तनरूपत्वं वा आश्रवभावनाया लक्षणम्।

महाव्रतपरिपालनसाहाय्यीभूतगुप्त्यादीनां मूलोत्तरगुणवच्चिन्तनानुरूपत्वं, यद्यदुपायकर्तृको यो य आश्रवनिरोधस्तत्तदुपायाऽनुचिन्तनरूपत्वं वा संवरभावनाया लक्षणम्।

तादृशोपायश्च प्रतिपाद्यते—

क्षमया क्रोधं, मृदुत्वेन मानं, ऋजुत्वेन मायां, संतोषेण लोभं, अखण्डसंयमेन विषयांश्च रुन्ध्यात्। तिसृभिर्गु-

कुर्वतो वधपरीषहजयो भवेत् ।

याचना मार्गणा, साधोर्वस्त्रपात्रान्नपानप्रतिश्रयादेः परतस्तस्य लब्धे सति न हर्षो, यदि च न लब्धं, न तदा शोकोऽपि, एवं कुर्वतो याचनापरीषहजयो भवेत् ।

अलाभस्तु याचिते सति विद्यमानमपि अन्नपानादिकं कदाचिद् ददाति, कदाचिच्च न, कस्तत्रासन्तोषाऽवकाशः, एवं विचारयतोऽलाभपरीषहजयो भवेत् ।

रोगो ज्वरा-तिसार-कास-श्वासादिकरूपः, तस्य प्रादुर्भावे सत्यपि न चिकित्सां प्रति प्रवर्तेत, प्राक् कर्मणां परिपाकोऽयमिति चिन्तयेत्, गच्छवासिनस्तु अल्पबहुत्वालोचनया सम्यक् सहन्ते प्रवचनोक्तविधिना । एवं कुर्वतो रोगपरीषहजयो भवेत् ।

अशुषिरतृणदर्भादेः परिभोगोऽनुज्ञातो गच्छनिर्गतानां गच्छवासिनां च यत्र शयनमनुज्ञातं तत्र तान् तृणदर्भादीन् भूमावास्तीर्य संस्तारोत्तरपट्टकौ च तदुपरि पिधाय ते शेरते । चौरापहृतोपकरणा वा प्रतनुकौ संस्तारोत्तरपट्टकावत्यन्तजीर्णौ वा, तथापि तत्परुषकुशदर्भादितृणस्पर्शं सम्यक् सहन्ते । एवं कुर्वतः तृणस्पर्शपरीषहजयो भवेत् ।

मलस्तु रजःपरागमात्रं स्वेदवारिसंपर्ककाठिनीभूते वपुषि स्थिरतां प्राप्तो ग्रीष्मोष्मसंतापजनितघर्मजकार्द्रतां

गतो यद्यपि दुर्गन्धिमहान्तमुद्वेगमुत्पादयति । तथापि तदपनयनाय न कदाचिदपि अभिषेकाद्यभिलाषं करोति। एवं कुर्वतो मलपरीषहजयो भवेत्।

प्रज्ञा बुद्ध्यतिशयः, तं प्राप्तोऽपि गर्वं नोद्वहेदिति कुर्वतः, प्रज्ञाप्रतिपक्षीभूतेन मन्दबुद्धित्वं प्राप्तेन परीषहो भवति, नाऽहं किञ्चिज्जाने, मूर्खोऽहं सर्वैः परिभूतोऽहमेवं परितापागतस्य परीषहो भवति, तदकरणात् कर्मविपाको ऽयमिति चिन्तयतो वा प्रज्ञापरीषहजयो भवेत्।

ज्ञानं श्रुताख्यं चतुर्दशपूर्वरूपं द्वादशाङ्गरूपं वा मयाऽधीतं, समस्तश्रुतधरोऽहमिति वा गर्वमुद्वहते, तत्र चागर्वकरणात् ज्ञानपरीषहजयो भवेत्, अथवा ज्ञानप्रतिपक्षेणाविज्ञानेनागमशून्यतया परीषहो भवतीति ज्ञानावरणक्षयोपशमोदयविजृम्भितमेतदिति चिन्तयन् स्वकृतकर्मफलपरिभोगादपैति, तपोऽनुष्ठानेन च, एवं पर्यालोचयतो ज्ञानपरीषहजयोभवेत्।

अदर्शनपरीषहस्तु सर्वपापस्थानेभ्यो विरतः प्रकृष्टतपोऽनुष्ठायी निःसङ्गश्चाऽहं तथापि धर्माधर्मदेवनारकादीन् नेक्षे, मृगतृष्णासममेतदिति दर्शनपरीषहः। तत्रैवमालोचयेद्, धर्माधर्मौ पुण्यपापलक्षणौ यदि कर्मपुद्गलात्मकौ, ततस्तौ कार्यदर्शनादनुमीयेते। अथवा क्षमाक्रोधादिरूपौ, ततः स्वानुभवत्वादात्मपरिणामरूपत्वाच्च प्रत्यक्ष एव।

देवास्तु अत्यन्तरतसुखासक्तत्वाद् मनुष्यलोके च कार्याभावाद् दुःखानुभावाच्च दर्शनगोचरं न आयान्ति; नारकास्तु तीव्रवेदनार्त्ताः पूर्वकृतकर्मोदयनिगडबन्धनवशीकृतत्वादस्वतन्त्राः कथमायान्तीत्येवमालोचयतोऽदर्शनपरीषहजयो भवेत् ।

एते परीषहा ज्ञानावरणवेदनीयदर्शनचारित्रमोहनीयान्तरायलक्षणानां पञ्चानां कर्मप्रकृतीनामुदयेन प्रादुर्भवन्ति ।

तेषां च परीषहाणां मध्ये क्षुत्पिपासाशीतोष्णदंशमशकचर्याऽलाभप्रज्ञाऽज्ञानशय्यावधरोगतृणस्पर्शमललक्षणाश्चतुर्दश परीषहाः सूक्ष्मसंपरायस्य छद्मस्थवीतरागयतेश्च भवन्ति ।

तत्र संपरायो नाम लोभाख्यः कषायः, तस्य बादरखण्डानि परिशाटितानि, नवमे गुणस्थाने दशमे गुणस्थाने च सूक्ष्मलोभपरमाणवो विद्यन्ते ।

तथा च सूक्ष्मः संपरायो यस्यासौ सूक्ष्मसंपरायः शमकः क्षपको वा संयतस्तस्य सूक्ष्मसंपराययतेः छद्म आवरणं, तत्र स्थिताः छद्मस्थाः सावरणज्ञाना इत्यर्थः । वीतोऽपेतो रागः सकलमोहोपशमात् समस्तमोहक्षयाच्च यस्यासौ वीतरागः क्रमेणैकादशगुणस्थानवर्त्ती द्वादशगुणस्थानवर्त्ती च संयतौ ग्राह्यौ । एवं च दशमैकादशद्वादशगुणस्थानवर्त्तिषु संयतेषु पूर्वोक्ताश्चतुर्दश परीषहा भवन्ति ।

समस्तचारित्रमोहस्योपशमक्षयान्यतरूपत्वे सति शुद्धात्मस्वभावावस्थानापेक्षारूपत्वं यथाख्यातचारित्रस्य लक्षणम् ।

इति ए-एम्-ए-एस्-बीत्युपाधियुक्त-शास्त्रविशारद-जैनाचार्य-श्रीमद्वि-
जयधर्मसूरीश्वरचरणारविन्दभृङ्गायमाणेन न्यायतीर्थ-न्यायवि-
शारदोपाधियुक्तेन प्रवर्त्तकश्रीमङ्गलविजयेन विरचिते
जैनतत्त्वप्रदीपाख्ये ग्रन्थे संवरतत्त्ववर्णननामा
पञ्चमोऽधिकारः समाप्तः ।

षष्ठोऽधिकारः ।

अथ लक्षणविधानाभ्यां निर्जरास्वरूपं प्रतिपाद्यते-

लक्षणं तु प्रागुक्तमपि प्रकरणवशादत्रापि निगद्यते-

परिपक्वभूतानां कर्मावयवानामात्मप्रदेशेभ्यः परिशाटनरूपत्वं निर्जराया लक्षणम् ।

सा च निर्जरा तपसा भवति ।

अभिनवकर्मप्रवेशाभावरूपत्वे सति पूर्वोपार्जितकर्मपरिक्षयरूपत्वं तपसो लक्षणम् ।

तपः सेव्यमानेनात्मप्रदेशेभ्यः कर्माणि विघट्यन्ते । शुष्करसीभूतं कर्म निःस्नेहं सद् बन्धनात् परिशटतीत्यर्थः।

तेनैव तपसा संवरो भवति निर्जरा च । तथाहि—
अनशनादिप्रायश्चित्तध्यानादितया युक्तोऽवश्यतयैव संवृताश्रवद्वारो भवति ।

तच्च तपो द्विविधं, बाह्याभ्यन्तरभेदात् ।

तत्रापि बाह्यं षोढा, अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशयनासनलीनतालक्षणबाह्यतपोभेदात् ।

अथ तेषां लक्षणद्वारा स्वरूपमुच्यते—

संयमरक्षणकर्मनिर्जराप्रयोजनत्वे सति चतुर्थषष्ठाष्टमादिरूपत्वं सम्यगनशनतपसो लक्षणम् ।

अवमौदर्यं नाम न्यूनाहारः, तच्चाहारपरिमाणे ज्ञाते सत्यवमौदर्यं ज्ञायते। तथा चाहारपरिमाणं कथ्यते।

तत्र पुंसो द्वात्रिंशत्कवलप्रमाणमाहारः।

अष्टकवलाभ्यवहाररूपत्वे सति न्यूनोदररूपत्वमुत्कृष्टावमौदर्यस्य लक्षणम्।

द्वादशकवलाभ्यवहाररूपत्वे सति न्यूनोदररूपत्वमुपार्धावमौदर्यस्य लक्षणम्।

द्वात्रिंशत्कवलाहारस्य मध्ये एकेनोनाहाररूपत्वे सति किञ्चिन्न्यूनोदररूपत्वं जघन्यावमौदर्यस्य लक्षणम्।

निक्षिप्तचयादीनां कुलमासादीनां च मध्येऽन्यतममभिगृह्य शेषस्य च प्रत्याख्यानरूपत्वं वा, भैक्ष्यस्यागमविहितविधिनाभिग्रहकरणरूपत्वं वा वृत्तिपरिसंख्यानस्य लक्षणम्।

मधु-मद्य-मांस-नवनीतलक्षणाभक्ष्यस्य सर्वथा परित्यागे सति क्षीर-दधि-गुड-तैलादिरूपभक्ष्यविकृतीनां कारणमुक्त्वाऽन्यत्र परित्यागे च सति विरसद्रव्यादिविषयकाभिग्रहकरणरूपत्वं रसपरित्यागलक्षणबाह्यतपसो लक्षणम्।

गर्हितजनसंपातरहितत्वे सति एकान्तेन बाधारहितस्थाने शय्यासनकरणरूपत्वं विविक्तशय्यासनलक्षणबाह्यतपसो लक्षणम्।

शून्यागारदेवकुलसभापर्वतगुहादीनां मध्येऽन्यतमस्मिन् स्थाने समाध्यर्थं व्यवस्थानलक्षणगात्रसंकोचनकरणरूपत्वं लीनतारूपबाह्यतपसो लक्षणम् ।

आगमानुसारेणात्मनः कायद्वारेण वीरासनाद्यासनजन्यबाधासहनरूपत्वं कायक्लेशरूपबाह्यतपसो लक्षणम् ।[1]

यदि लीनताऽत्रान्तर्भूता, तर्हि पृथग् न वक्तव्या, किन्तु वैराग्यार्थं पृथगुच्यते । यदि चास्यापेक्षया किञ्चिद्भेदमुपादाय भिन्ना कथ्यते ततः सुतरां भिन्नप्रतिपादनमस्याः ।

अथवा कायोत्सर्गवीरासनोत्कटुकासनैकपार्श्वदण्डायतशयनातापनलुञ्चनादिकष्टरूपत्वं कायक्लेशस्य लक्षणम् ।

ईदृग्लक्षणं यद्युच्यते, तर्हि लीनताया लक्षणं सर्वथा न वक्तव्यं, अनेनैव गतार्थत्वात् ।

अस्मात् षड्विधाद् बाह्यतपसः संगत्यागशरीरलाघवेन्द्रियजयसंयमरक्षणकर्मनिर्जरादयो भवन्ति ।

तत्र निःसङ्गो नाम बाह्याभ्यन्तरोपाधिषु निर्ममता । ततश्च मासकल्पविहारस्थायोग्यतावर्जनात् शरीरलाघवम्, ततश्चाप्रणीतशरीरस्योन्मादानुद्रेकादिन्द्रियजयः, ततश्च भक्तपानार्थं गच्छतश्चर्याजनितजन्तूपघाताभावात् संयमरक्षणं, ततश्च निःसङ्गादिगुणयोगादनशनादितपो-

---

१. तत्र समाधिर्नाम ज्ञानदर्शनचारित्रतपोवीर्यात्मकः पञ्चधा, तेषां या वृद्धिस्तस्या इच्छा तदर्थमित्यर्थः ।

अष्टविधकर्मचयरिक्तकरणनिमित्तकत्वे सति नूतनकर्मबन्धाकरणरूपत्वं चारित्रविनयस्य लक्षणम् ।

तत्र ज्ञानविनयः पञ्चधा, मत्यादिज्ञानपञ्चकभेदात् ।

दर्शनविनयशब्देन सम्यग्दर्शनविनय उच्यते । अतः तस्य स्वरूपं निगद्यते—

अर्हत्प्रणीतस्य धर्मस्याचार्योपाध्यायस्थविरकुलगणसंघसाधुसांभोगिकानामनासादनप्रशमसंवेगनिर्वेदानुकम्पास्तिक्यसंपादनद्वारा सम्यग्दर्शनविनयो भवति ।

चारित्रविनयः पञ्चधा, पञ्चविधचारित्रभेदात् ।

सम्यग्दर्शनज्ञानचारित्रादिगुणाधिकेऽभ्युत्थानासनप्रदानवन्दनानुनमनादिकरणरूपत्वमुपचारविनयस्य लक्षणम् ।

वैयावृत्त्यं प्रतिपाद्यते—

तच्च दशधा, अर्हदाचार्योपाध्यायतपस्विशैक्षकग्लानकुलसंघसाधुसमनोज्ञवैयावृत्त्यभेदात् ।

प्रकृष्टतपोयुक्तः तपस्वी तस्य वैयावृत्त्यम्, अचिरप्रव्रजितः शैक्षकः, अथवा शिक्षामर्हतीति शैक्षः, शिक्षणशीलः शैक्षः, तस्य वैयावृत्त्यम्; स्थविरसंततिसंस्थितिर्गणः, कुलमेकाचार्यसंततिसंस्थितिः, संघश्चतुर्विधः ।

मूलोत्तरगुणसंपन्नाः साधवो मनोज्ञाः, मनोज्ञानिवा ज्ञानदर्शनचारित्राणितैः सह वर्तन्ते ते समनोज्ञाः ।

एषां वस्त्रपात्रान्नपानप्रतिश्रयपीठफलकसंस्तारका-दिभिर्धर्मसाधनैर्वैयावृत्त्यं कार्यम्।

अपि च, शुश्रूषाभेषजक्रियाकान्तारविषमदुर्गोपसर्गे-ष्वभ्युपपत्तिरित्यादिरूपं वैयावृत्त्यं कार्यम्।

स्वाध्यायः पञ्चधा, वाचनाप्रच्छनानुप्रेक्षाम्नायधर्मोपदेशभेदात्।

तेषां लक्षणं तु क्रमेण निगद्यते—

शिष्याध्यापनरूपत्वं, कालिकोत्कालिकस्यालापक्रमदानरूपत्वं वा वाचनाया लक्षणम्।

संशयदूरीकरणार्थं सूत्रार्थयोः प्रच्छनरूपत्वं प्रच्छनाया लक्षणम्।

उदात्तादिघोषपरिशुद्धिपूर्वकपरावर्त्तनरूपत्वमाम्नायस्य लक्षणम्।

श्रुतचारित्रलक्षणधर्मोपदेशरूपत्वमुपदेशस्य लक्षणम्।

प्रवचनोक्तविधिना संसक्तासंसक्तान्नपानवस्त्रपात्रादीनां व्युत्सर्गो भवति; स च द्विविधो बाह्याभ्यन्तरभेदात्। तयोः क्रमेण लक्षणं निगद्यते-पर्यन्तकाले परिज्ञायौघिकौपग्राहिकोपधिशरीरादीनां परित्यागकरणरूपत्वं बाह्यव्युत्सर्गस्य लक्षणम्।

कामक्रोधमदहर्षादीनां परित्यागकरणरूपत्वमाभ्यन्तरव्युत्सर्गस्य लक्षणम्।

अथ ध्यानं प्रतिपाद्यते । तत्र प्रथमतो ध्यानस्य सामान्यलक्षणमुच्यते —

उत्तमसंहननस्यैकाग्रचिन्तानिरोधरूपत्वं ध्यानसामान्यस्य लक्षणम् ।

तच्च ध्यानं चतुर्विधमार्त्तरौद्रधर्मशुक्लभेदात् ।

शोकाक्रन्दनविलपनादिरूपत्वमार्त्तध्यानस्य लक्षणम् ।

क्रूरपरिणामादिरूपत्वं रौद्रध्यानस्य लक्षणम् ।

जिनप्रणीतभावश्रद्धानादिनिमित्तकत्वं धर्मध्यानस्य लक्षणम् ।

अबाध्यासंमोहादिकरणरूपत्वं शुक्लध्यानस्य लक्षणम् ।

तच्च ध्यानमन्तर्मुहूर्त्तकालपरिमाणं भवति, नाधिकं, शक्त्यभावात्, मोहनीयकर्मानुभावात्, क्लेशाद् वा ।

तादृशचतुर्विधध्यानानां मध्ये धर्मशुक्ले मोक्षहेतू भवतः, आर्त्तरौद्रे च संसारहेतू भवतः ।

---

१ अत्र उत्तमसंहननपदेन वज्रर्षभनाराचर्षभनाराचनाराचलक्षणानि त्रीणि संहननानि गृह्यन्ते, तद्वदेकाग्रचिन्तानिरोधो ध्यानमुच्यते, तथा चोत्तमसंहननस्यैकस्मिन्नालम्बनीभूते पदार्थे चिन्तानिरोधो यः तद् ध्यानं कथ्यते । चिन्तानिरोधस्तु, चलचित्तमेव चिन्ता तस्य निरोध एकत्रावस्थापनम्, अन्यत्र प्रचारनिरोधो वा, तत्र छद्मस्थविषयं ध्यानं निश्चलं स्थिरमध्यवसानमेकालम्बनीभूतम्; केवलिनां पुनर्योगनिरोध एव ध्यानं मनसोऽभावात्; न हि अवाप्तकेवलस्य मनोव्यापारः समस्ति, सकलकरणग्रामनिरपेक्षत्वात् ।

यत् तद्रूपत्वमेकत्ववितर्काप्रविचारशुक्लध्यानस्य लक्षणम् ।

सूक्ष्मक्रियाप्रतिपातिरूपत्वं वा निरुद्धयोगद्वयावस्थात्त्वे सति केवलकायव्यापारवतां यद्ध्यानं तत् तृतीयशुक्लध्यानस्य लक्षणम् ।

व्युपरतक्रियानिवृत्तिरूपत्वं वा शैलेश्यवस्थानां ह्रस्वाक्षरोच्चारणसमकालानां योगत्रयरहितानां यद्ध्यानं भवति तत् चतुर्थशुक्लध्यानस्य लक्षणम् ।

पृथक्त्ववितर्कसप्रविचारैकत्ववितर्काप्रविचारलक्षणे शुक्लध्याने उपशान्तकषायक्षीणकषाययोर्भवतः ।

अथ भावार्थः प्रतिपाद्यते—

षण्णां द्रव्याणां मध्ये एकद्रव्ये उत्पादव्ययध्रौव्यादिपर्यायानेकतयार्पितत्वं पृथक्त्वं तस्य चिन्तनं वितर्कसहचरितं सप्रविचारं यत्र तत् पृथक्त्ववितर्कसप्रविचारं, तत्र वितर्कः श्रुतं विचारोऽर्थव्यञ्जनयोगसंक्रान्तिः । तथा च फलितलक्षणमुच्यते—पूर्वगतभाङ्गिकश्रुतानुसारेणार्थव्यञ्जनयोगान्तराणां यत्र संक्रान्तिस्तत्रैव निरोधरूपत्वं प्रथमशुक्लध्यानस्य लक्षणम् ।

तथा चार्थाद् व्यञ्जनसंक्रान्तिः, मनोयोगात् काययोगसंक्रान्तिः, काययोगाद् मनोयोगसंक्रान्तिः, एवं वाग्योगान्मनोयोगसंक्रान्तिः, काययोगसंक्रान्तिश्च । एवं रीत्यार्थव्यञ्जनयोगसंक्रान्तिर्ज्ञेया ।

एकत्वगतो वितर्क एकत्ववितर्कः, त्रयाणामेक एव योगस्तथार्थव्यञ्जनमपि एकमेव। तथा च फलितलक्षणमुच्यते-उत्पादव्ययध्रौव्यादिपर्यायाणामेकस्मिन् पर्याये निष्प्रकम्पपूर्वगतश्रुतानुसारिचेतसा चिन्तनरूपत्वं वा, पर्यायान्तरानर्पितैकपर्यायचिन्तनरूपत्वं वा द्वितीयशुक्लध्यानस्य लक्षणम्, निर्वातस्थप्रदीपवत्।

आद्ये शुक्लध्याने पूर्वविदो भवतः।

परे द्वे केवलिनस्त्रयोदशचतुर्दशगुणस्थानयोः क्रमेण भवतः, न छद्मस्थस्य।

तदेतच्चतुर्विधशुक्लध्यानं त्रियोगायोगानां भवति।

तत्र त्रियोगानां पृथक्त्ववितर्कलक्षणप्रथमशुक्लध्यानम्, त्रयाणां मध्येऽन्यतमैकयोगानामेकत्ववितर्कलक्षणद्वितीयशुक्लध्यानम्, काययोगानां सूक्ष्मक्रियाप्रतिपत्तिलक्षणतृतीयशुक्लध्यानम्। अयोगानां व्युपरतक्रियानिवृत्तिलक्षणचतुर्थशुक्लध्यानम्।

एकद्रव्याश्रये सवितर्के पूर्वध्याने, तत्रापि सविचारं प्रथमम्, अविचारं द्वितीयम्।

एतदभ्यन्तरतपः संवरत्वादभिनवकर्मोपचयप्रतिषेधकं पुराणकर्मनिर्जरकं पूर्वोपचितकर्मनिर्जरत्वाच्च निर्वाणप्रापकम्।

किंच, सम्यग्दृष्ट्यादीनां क्रमशोऽसंख्येयगुणनिर्जरा भवति। तथाहि-सम्यग्दृष्ट्यपेक्षया श्रावकस्यासंख्येयगुण-

निर्जरा भवति, श्रावकापेक्षया विरतस्य, तदपेक्षयानन्तानुबन्धिवियोजकस्य, तदपेक्षया दर्शनमोहक्षपकस्य, तदपेक्षया मोहोपशमकस्य, तदपेक्षयोपशान्तमोहस्य, तदपेक्षया मोहक्षपकस्य, तदपेक्षया क्षीणमोहस्य, तदपेक्षया जिनस्य ।

अस्य वैचित्र्यभागिनः संवरचारित्रस्य के स्वामिन इति प्रदर्शनार्थमुच्यते,

पुलाकबकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्था भवन्ति ।

लक्षणवाक्यं तु निगद्यते—

निर्वाणहेतुभूतजिनोक्तागमादपरिभ्रष्टश्रद्धानपूर्वकज्ञानानुसारेण क्रियानुष्ठायित्वे सति लब्ध्युपजीवितरूपत्वं पुलाकनिर्ग्रन्थस्य लक्षणम् ।

स च पुलाकः पञ्चविधः, ज्ञान-दर्शन-चरण-लिङ्ग-सूक्ष्मपुलाकभेदात्, तेषां क्रमेण लक्षणमुच्यते ।

आवश्यकादिसूत्रविषयकस्खलनादिकरणरूपत्वं ज्ञानपुलाकस्य ।

कुदृष्टिभिः सह संस्तवादिकरणरूपत्वं दर्शनपुलाकस्य ।

मूलोत्तरगुणप्रतिसेवनासंपादनत्वं चरणपुलाकस्य ।

प्रवचनोक्तलिङ्गस्याधिकरणरूपसंपादनत्वं लिङ्गपुलाकस्य ।

किञ्चित्प्रमादकरणरूपत्वं सूक्ष्मपुलाकस्य ।

लिङ्गद्वारम्। लिङ्गं द्विविधम्, द्रव्यभावभेदात्।

तत्र द्रव्यलिङ्गं रजोहरणमुखवस्त्रिकादिकं, भावलिङ्गं ज्ञानदर्शनचारित्राणि। तथा च सर्वे पुलाकादयो भावलिङ्गे भवन्ति, द्रव्यलिङ्गे तु भजना, कदाचिद्रजोहरणादिकं भवति कदाचिन्नेति मरुदेवीवत्।

लेश्याद्वारम्। पुलाकस्य पीतपद्मशुक्लनामानः तिस्रो भवन्ति, वकुशप्रतिसेवनाकुशीलयोः सर्वाः षडपि लेश्या भवन्ति, परिहारविशुद्धसंयमप्राप्तस्य कषायकुशीलस्य तिस्र उत्तरा लेश्या भवन्ति; सूक्ष्मसंपरायसंयमप्राप्तस्य कषायकुशीलस्य तथा निर्ग्रन्थस्य तथा सयोगिस्नातकस्य च त्रयाणां शुक्लैव लेश्या भवन्ति, शैलेशीप्रतिपन्नस्य स्नातकस्य लेश्या नास्ति।

उपपातद्वारम्। पूर्वभवं परित्यज्य भवान्तरप्राप्तिरुत्पातः।

तत्र च पुलाकस्योत्पत्तिः सहस्रारदेवे, वकुशप्रतिसेवनाकुशीलयोरारणाच्युतकल्पयोः, कषायकुशीलनिर्ग्रन्थयोः सर्वार्थसिद्धिविमाने, स्नातकस्य निर्वाणम्। सर्वेषामपि निर्ग्रन्थानां जघन्योत्पत्तिः पल्योपमपृथक्त्वस्थितिषु देवेषु सौधर्मेषु।

अथ स्थानद्वारम्। सर्वजघन्यसंयमस्थानानि पुलाक-

कुशीलयोः, तौ युगपदसंख्येयस्थानानि गच्छतः । ततः पुलाको व्युच्छिद्यते । कषायकुशीलस्तु असंख्येयस्थानानि एकैको गच्छति, ततः कषायकुशीलप्रतिसेवनाकुशीलबकुशा युगपदसंख्येयस्थानानि गच्छन्ति, ततो बकुशो व्युच्छिद्यते । ततोऽसंख्येयस्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते । ततोऽसंख्येयस्थानानि गत्वा कषायकुशीलो व्युच्छिद्यते । अत ऊर्ध्वमकषायस्थानानि निर्ग्रन्थः प्रतिपद्यते । सोऽपि असंख्येयस्थानानि गत्वा व्युच्छिद्यते । अत ऊर्ध्वं स्थानं गत्वा निर्ग्रन्थस्नातको निर्वाणं प्राप्नोतीत्येषां संयमलब्धिरनन्तगुणा भवति । अत्र स्थानपदेनाध्यवस्थानं वा परिणामस्थानं वा संयमस्थानं वा गृह्यते । तत्र यावत्कषायस्तावत् संक्लेशविशोधयोऽवश्यभाविन्यः । क्षीणकषायस्य तु विशोधिरेव, न संक्लेशः । तत्र कषायस्यासंख्येयानि संयमस्थानानि, भावना त्वियं कार्या–पुलाककषायकुशीलयोः सर्वजघन्यस्थानानि यानि सन्ति, अधस्ततस्तौ युगपदसंख्येयस्थानानि गच्छतः, तुल्याध्यवसायत्वात्, ततः पुलाको व्युच्छिद्यते, हीनपरिणामत्वात् । व्युच्छिन्ने पुलाके कषायकुशील एक एवासंख्येयानि स्थानानि गच्छति, वर्धमानपरिणामत्वात्, कषायप्रतिसेवनाकुशीलबकुशा युगपदसंख्येयस्थानानि गच्छन्ति, ततो बकुशो व्युच्छिद्यते, ततः तावन्ति गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते । ततस्तावन्ति गत्वा कषायकुशीलो व्युच्छिद्यते । ततो निर्ग्र-

न्योऽसंख्येयस्थानानि गत्वा व्युच्छिद्यते। अत ऊर्ध्वं गत्वा क्षपितसकलकर्मांशः स्नातको निर्वाणं प्राप्नोति।

इति ए-एम्-ए-एस्-वीत्युपाधियुक्त-शास्त्रविशारद-जैनाचार्य-श्रीमद्वि-
जयधर्मसूरीश्वरचरणारविन्दभृङ्गायमाणेन न्यायतीर्थ-न्यायवि-
शारदोपाधियुक्तेन प्रवर्त्तकश्रीमङ्गलविजयेन विरचिते
जैनतत्त्वप्रदीपाख्ये ग्रन्थे निर्जरातत्त्ववर्णननामा
षष्ठोऽधिकारः समाप्तः।

धर्मास्तिकायाभावात्। जीवपुद्गलानामुपग्रहकारणं धर्मास्तिकायः, तस्याभावात् परतो गतिर्नास्ति, यथाऽलाबुनो नाधो नापि तिर्यक् किन्तु तत्रैवोर्ध्वमनुश्रेणि गतिः, एवं मुक्तोऽपि निष्क्रियो लोकान्तेऽवतिष्ठते।

बन्धच्छेदादिति, यथा रज्ज्वा गाढं बद्धायाः कीचकविदलघटिताया रज्जुबन्धच्छेदादुपरितनपुटस्यागमनमूर्ध्वं दृष्टम्, यथा वा बीजीकोशः फलं फली वा तस्या बन्धनं गाढसंपुटता, तस्याः सवितृकिरणतापशोषितायाः परिणतिकाले संपुटोद्भेदलक्षणश्छेदः, तस्माद् बन्धच्छेदादेरण्डादिफलभेदे बीजानां गतिः, यथा बीजान्युड्डीय दूरे पतन्ति, तथा कर्मबन्धोऽत्र फलादिस्थानीयः, तस्य च्छेदात्तद्विघटनानन्तरमेवोर्ध्वं गच्छत्यालोकान्तात्।

तथा गतिपरिणामाच्च सिद्ध्यमानस्य गतिर्भवति। गतिमत्त्वमत्र जीवपुद्गलानां भवति, नान्यद्रव्याणाम्।

तत्राधोगौरवधर्माणः पुद्गलाः, ऊर्ध्वगौरवधर्माणो जीवाः, एष स्वभावः। तथा च सत्सु प्रयोगादिषु गतिकारणेषु जातिनियमेनाधस्तिर्यगूर्ध्वं स्वाभाविक्यो लोष्टवायुवह्नीनां गतयो दृष्टाः, तथा कर्मसङ्गविमुक्तस्योर्ध्वगौरवादूर्ध्वमेव सिद्ध्यमानस्य गतिः, संसारिणस्तु कर्मसंयोगादधस्तिर्यगूर्ध्वं च गतयो भवन्ति।

एवं च निसर्गाधिगमयोरन्यतरत्र तत्त्वार्थश्रद्धानात्मकं

शङ्काद्यतिचारवियुक्तं प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं विशुद्धसम्यग्दर्शनं प्राप्य सम्यग्दर्शनोपलम्भाच्च विशुद्धज्ञानं प्राप्य प्रमाणनयनिक्षेपाद्युपायैर्जीवाजीवानां तथा पञ्चानां भावानां स्वरूपं ज्ञात्वा तथाऽनादिमतां धर्मास्तिकायादिद्रव्याणामादिमतामिन्द्रधनुरादीनां स्थित्युत्पत्तिव्ययानामनुग्रहोपघातकारणं ज्ञात्वा सांसारिकभावेभ्यो विरक्तः पञ्चसमितित्रिगुप्तियुक्तो दशलक्षणधर्मानुष्ठानात् फलदर्शनाच्च निर्वाणप्राप्तिप्रयत्नाभिवर्द्धितश्रद्धासंवेगो भावनाभिर्भावितात्माऽनुप्रेक्षाभिः स्थिरीकृतात्मा संवृतत्वादनभिष्वङ्गो निराश्रवत्वाद् विरक्तत्वाद् विगततृष्णत्वाच्च व्यपगताभिनवकर्मोपचयः, परीषहजयाच्च बाह्याभ्यन्तरतपोऽनुष्ठानादनुभावतश्च सम्यग्दृष्टिविरतादीनां जिनपर्यन्तानां परिणामाध्यवसायविशुद्धिस्थानान्तराणामसंख्येयगुणोत्कर्षप्राप्तोऽपूर्वकर्म निर्जरयन् सामायिकादीनां सूक्ष्मसंपरायपर्यन्तानां संयमविशुद्धिस्थानानां पुलाकादिनिर्ग्रन्थानां पालनविशुद्धिस्थानविशेषाणामुत्तरोत्तरप्रतिपत्त्या घटमानोऽत्यन्तप्रहीणार्त्तरौद्रध्यानो धर्मध्यानविजयादवाप्तसमाधिबलः पृथक्त्वैकत्ववितर्कशुक्लध्यानयोश्चान्यतरस्मिन् वर्त्तमानो नानाविधलब्धिविशेषान् प्राप्नोति। ततोऽस्य निस्तृष्णत्वात्तत्त्वनभिष्वक्तस्य मोहक्षयपरिणामावस्थस्याष्टाविंशतिविधं मोहनीयं निर्विशेषतो हीयते। ततश्च छद्मस्थवीतरागत्वं प्राप्तस्यान्तर्मुहूर्तेन ज्ञानदर्शनावरणान्त-

	पृष्ठं	पङ्क्तिः
अनङ्गक्रीडा	८३	२
अनन्तानुबन्धिकषाय	१००	२
अनभिगृहीतादिकमिथ्यात्व	९३	५
अनर्थदण्ड	७७	१८
अनवकाङ्क्षक्रिया	४६	२१
अनादर	८७	७
अनादिविस्रसाबन्ध	३६	११
अनादेयनामकर्मन्	११५	४
अनाभोगबकुश	१५५	७
अनाभोगिकक्रिया	४७	२
अनाभोगिकनिक्षेप	५२	२०
अनाहार	२२	९
अनित्यभावना	१२७	१६
अनिश्रितग्राहित्व	६	१६
अनीक	२८	१३
अनुकम्पा	५६	७
अनुत्सेक	६७	८
अनुपयुक्तमनोवाक्काय	४८	२२
अनुभागबन्ध	९५	२०
अनुश्रेणिगति	२१	१०
अन्तराय	५४	२१
अन्तराय	६७	१३
अन्यस्थौल्य	३६	२१

	पृष्ठं	पङ्क्तिः
अन्नपाननिरोध	८१	२
अन्यत्वभावना	१२८	१६
अन्यदृष्टिप्रशंसा	८०	१०
अन्यदृष्टिसंस्तव	८०	१२
अन्यविवाहकरण	८२	१६
अपर	३४	१८
अपर्याप्तिनामकर्मन्	११४	१७
अपान	३३	१४
अपान	१११	१
अपाय	९	१२
अपायविचयधर्मध्यान	१९१	२
अप्रत्यवेक्षितनिक्षेप	९२	९
अप्रत्याख्यानकषायमोहनीय	१००	४
अप्रत्याख्यानक्रिया	४९	१८
अब्रह्मन्	६८	२१
अभव्यत्व	१७	२०
अभिगृहीतमिथ्यात्व	९२	११
अमनस्क	१८	६
अम्लाधिकरण	४८	१९
अयशःकीर्त्तिनामकर्मन्	११९	६
अरतिमोहनीय	१०२	१२
अरतिमोहनीयाश्रव	६१	८
अर्थावग्रह	५	१

	पृष्ठं	पङ्क्तिः
अवग्रह	४	१८
अवग्रह	७	४
अवधिज्ञान	११	९
अवधिज्ञान	९८	११
अवधिज्ञानावरण	९७	१७
अवधिदर्शन	७	१३
अवधिदर्शन	९८	११
अवधिदर्शनावरण	९८	१४
अवमौदर्य	१४२	१
अवर्णवाद	५७	२०
अवस्थित	३१	१६
अविच्युति	५	१६
अविरति	९३	६
अशरणभावना	१२८	२
अशुचिभावना	१२८	१९
अशुभ	४३	१९
अशुभयोग	४४	१
अश्रुतनिश्रितमति	४	१६
असंज्ञिन्	२०	११
असंदिग्धग्राहित्व	६	१७
असंयत	१६	२२
असंवृत्तबकुश	१५५	९
असत्य	६८	५

	पृष्ठं	पङ्क्तिः
उत्सर्गसमिति	१२४	२१
उद्द्योत	३७	१२
उद्द्योत	१११	७
उद्भावन	६७	४
उपकरणवकुश	१५७	११
उपकरणेन्द्रिय	१९	११
उपघात	५५	३
उपघातनामकर्मन्	११२	८
उपघाताधिकरण	४८	१२
उपचरणवकुश	१५५	१५
उपचारविनय	६४	२१
उपचारविनय	१४६	११
उपदेश	१४७	१४
उपपातजन्मन्	२२	१६
उपभोगाधिक्य	८६	१८
उपभोगान्तराय	११५	२०
उपयोग	१	११
उपयोग	१	१३
उपयोगेन्द्रिय	१९	२१
उपस्थापनाप्रायश्चित्त	१४५	९
उपार्धावमौदर्य	१४२	७
उष्णयोनि	२३	११

	पृष्ठं	पङ्क्तिः
ऊर्ध्वव्यतिक्रम	८४	२०
ऋजुगति	२०	१३
ऋजुमतिमनःपर्यायः	११	२०
ऋजुसूत्र	९	४
एकत्वभावना	१२८	१३
एकत्ववितर्काप्रवि .	१५२	१
एकेन्द्रियादिजातिनामकर्मन्	१०६	१४
एवंभूत	९	२०
एषणासमिति	७०	११
एषणासमिति	१२४	१५
ऐर्यापथिकाश्रव	४४	७
ओजआहार	२१	९
औत्पातिकी	१०	७
औदयिक	१२	१८
औदारिक	२९	७
औदारिकनामकर्मन्	१०६	२०
औदारिकबन्ध	१०८	८
औदारिकशरीर	१०६	१८

	पृष्ठ	पङ्क्तिः
औपशमिक	१२	१०
औपशमिकचारित्र	१३	९
कन्दर्प	८६	९
कर्मन्	४२	६
कर्मभूमि	२७	१०
कषाय	१६	१४
कपाय	९३	७
कषायकुशीलनिर्ग्रन्थ	१५६	४
कापोतलेश्या	१७	१०
काय	४२	१२
कायक्लेश	१४३	५
कायक्लेश	१४३	१०
कायगुप्ति	१२३	१६
कायदुष्प्रणिधान	८७	२
कायनिसर्गाधिकरण	५३	१३
काययोग	४२	१५
कायस्वभाव	७६	१४
कायिकक्रिया	४५	१९
कायिकशुभाश्रव	४३	११
कायिकाशुभाश्रव	४३	१२
कारुण्यभावना	७४	२२
कार्मण	२१	१

	पृष्ठं	पङ्क्तिः
कार्मणशरीर	२६	१
,,	१०७	१५
कार्मणशरीरनामकर्मन्	१०७	१६
कार्मणशरीरपरिणाम	९४	२२
कार्मिकी	१०	१०
कालसंपत्	९०	२१
कालातिक्रम	८९	१०
कावलिक	२२	८
काष्टकर्मरूपोत्तरगुणनिर्वर्त्तनाधिकरण	५१	२०
किल्बिषिक	२८	१६
कूटक्रयविक्रय	८२	१२
कूटलेख	८१	१३
कूर्मोन्नतयोनि	२४	५
कृष्णलेश्या	१७	६
केवल	५८	६
केवलज्ञान	१२	१
केवलज्ञानावरण	९८	२
केवलदर्शन	७	१५
केवलदर्शन	९८	१३
केवलदर्शनावरण	९८	१५
केवलिन्	५८	७
केवल्यवर्णवाद	५८	२
कौकुच्य	८६	११

	पृष्ठं	पङ्क्तिः
क्रिया	३४	१६
क्रियावत्त्व	३१	१८
क्रोधनिश्रितवचनप्रत्याख्यान	७१	९
क्षमा	१२९	११
क्षान्ति	९७	१
क्षायिक	१२	१६
क्षायिकचारित्र	१३	१३
क्षायिकज्ञान	१३	१५
क्षायिकदर्शन	१३	१६
क्षायिकदान	१३	१९
क्षायिकदान	१४	१०
क्षायिकभोग	१४	२
क्षायिकभोग	१४	१२
क्षायिकलाभ	१३	२१
क्षायिकलाभ	१४	११
क्षायिकवीर्य	१४	८
क्षायिकवीर्य	१४	१४
क्षायिकसम्यक्त्व	१३	१२
क्षायिकोपभोग	१४	४
क्षायिकोपभोग	१४	१३
क्षायोपशमिक	१२	१९
क्षायोपशमिक	१४	१७
क्षायोपशमिकचारित्र	१५	१०

	पृष्ठं	पङ्क्तिः
क्षायिकोपशमिकदर्शन	१४	२०
क्षायिकोपशमिकदानादिलब्धि	१५	१
क्षायोपशमिकसम्यक्त्व	१५	७
क्षायोपशमिकाज्ञान	१४	१९
क्षाराधिकरण	४८	१६
क्षिप्र	६	१५
क्षेत्र	८३	१४
क्षेत्रप्रमाणातिक्रम	८३	१६
क्षेत्रवृद्धि	८५	७
गति	१६	१२
गतिनामकर्मन्	१०६	२
गन्धादिनामकर्मन्	१०९	८
गर्भ	२२	१४
गुण	३२	३
गुण	९१	९
गुणसामान्य	४०	१२
गुणाच्छादन	६६	१७
गुप्तिसामान्य	१२३	७
गृहस्थसङ्घावर्णवाद	५९	६
घ्राणेन्द्रिय	२०	६

	पृष्ठ	पंक्ति
चक्षुरिन्द्रिय	[illegible]	४
चक्षुर्दर्शन	[illegible]	७
चक्षुर्दर्शन	५८	७
चक्षुर्दर्शनावरण	५८	८
चतुर्थभावना	७६	१५
चतुर्थगुणस्थान	१२६	[illegible]
चतुर्थातिचार	८८	१६
चतुर्थध्यान	१५९	१३
चरणकुशील	१५५	१६
चरणपुलाक	१५४	१८
चारित्र	१३८	८
चारित्रमोहनीय	६०	[illegible]
चारित्रविनय	६४	१८
चारित्रविनय	१५६	२
चित्रकर्मनिर्वर्तनाधिकरण	५२	२
छाया	२७	८
छेदनाधिकरण	४८	७
छेदप्रायश्चित्त	१४५	६
छेदातिचार	८०	१८
छेदोपस्थापनीय	१३९	५
जगत्स्वभाव	७२	१०

	पृष्ठं	पङ्क्तिः
जवन्यावमौदर्य	१४२	९
जरायु	२४	१३
जरायुज	२४	१४
जाति	९१	८
जीव	१	९
जीव	१२	६
जीवित	३३	२१
जीविताशंसा	८९	१६
जुगुप्सामोहनीय	१०२	१८
जुगुप्सामोहनीयाश्रव	६१	१२
ज्ञान	९७	६
ज्ञानकुशील	१५५	१७
ज्ञानपुलाक	१५४	१५
ज्ञानविनय	६४	१५
ज्ञानविनय	१४५	२१
ज्ञानावरणकर्मन्	९७	९
ज्ञानोपयोग	६५	५
ज्योतिष्क	२७	२०
तपस्	६५	९
तपस्	१४१	८
तमस्	३७	६
ताप	५६	१४

	पृष्ठं	पङ्क्तिः
तिर्यग्गति	२७	२
तिर्यग्गतिनामकर्मन्	१०६	५
तिर्यगायुः	१०४	२
तिर्यग्दिग्व्यतिक्रम	८५	२
तीर्थकृन्नामकर्मन्	१११	२१
तीव्रकाम	८३	६
तृतीयभावना	७२	१४
तृतीयशुक्लध्यान	१५२	४
तृतीयातिचार	८८	१३
तृतीयार्त्तध्यान	१४९	१०
तेजोलेश्या	१७	१२
तैजसशरीर	२५	१७
तैजसशरीर	१०७	११
तैजसशरीरनामकर्मन्	१०७	१२
तैर्यग्योनाश्रव	६२	२
त्याग	६५	८
त्याग	१२६	२०
त्रस	१८	८
त्रसनामकर्मन्	११२	१०
त्रायस्त्रिंश	२८	७
दर्शन	७	१
दर्शनकुशील	१५५	१८

	पृष्ठं	पङ्क्तिः
दर्शनपुलाक	१५४	१७
दर्शनविनय	६४	११
दर्शनविनय	१४५	१९
दर्शनविशुद्धि	६४	८
दहनाधिकरण	४८	८
दातृविशेष	९१	१२
दान	५६	९
दान	९०	१३
दानान्तराय	११५	१५
दार्ष्टिकीक्रिया	४६	३
दासीदासप्रमाणातिक्रम	८४	१३
दिग्व्रत	७७	१०
दुःख	३३	२०
दुःख	५५	१०
दुःस्वरनामकर्मन्	११५	२
दुर्भगनामकर्मन्	११५	१
दुष्पक्काहार	८६	४
दुष्प्रमार्जितनिक्षेपाधिकरण	५२	१२
देव	६०	३
देवगति	२७	१२
देवगतिनामकर्मन्	१०६	९
देवायुराश्रव	६२	१८
देवायुस्	१०४	७

	पृष्ठं	पङ्क्तिः
निदानशल्य	७६	९
निद्रा	९८	१६
निद्रानिद्रा	९८	१८
निन्दा	६६	१६
निर्ग्रन्थ	१५६	७
निरुपक्रम	२६	१७
निर्जरा	१३०	७
निर्जरा	१४१	५
निर्माणनामकर्मन्	११२	२
निर्विश्यमानकपरिहारविशुद्धचारित्र	१३९	१७
निर्विष्टकायिकपरिहारविशुद्धचारित्र	१३९	१७
निर्वृत्तीन्द्रिय	१८	२२
निष्क्रियत्व	३१	२०
निह्नव	५४	१७
नीचैर्गोत्र	११५	१२
नीचैर्वृत्ति	६७	७
नीललेश्या	१७	८
नैगम	८	१२
न्यासापहार	८१	१७
पञ्चमभावना	७२	१७
पञ्चमातिचार	८८	१८
पदार्थसामान्य	३०	८

	पृष्ठं	पङ्क्तिः
पद्मलेश्या	१७	१४
पर	३४	१७
परमाणु	३७	१७
परव्यपदेश	८९	७
पराघातनामकर्मन्	११०	१६
परिग्रह	६९	५
परिग्रहक्रिया	४५	१३
परिणाम	३४	१३
परिणाम	४०	४
परिणाम	४१	१०
परिदेवन	५५	१९
परिहारप्रायश्चित्त	१४५	८
परिहारविशुद्धचारित्र	१३९	१३
परीषह	१३१	१२
परोक्षप्रमाण	३	१९
पर्याप्तनामकर्मन्	११२	१५
पर्याय	३२	४
पर्यायार्थिक	८	५
पात्रविशेष	९१	१३
पारिणामिक	१२	२०
पारिणामिकी	१०	१४
पारितापिनी	४५	२२
पार्षद्य	२८	९

	पृष्ठं	पङ्क्तिः
पुद्गलक्षेप	८८	२
पुद्गलास्तिकाय	३१	११
पुरुषलिङ्ग	२६	८
पुरुषवेदमोहनीय	१०२	२१
पुरुषवेदाश्रव	६०	१६
पुलाकनिर्ग्रन्थ	१५४	१२
पृथक्त्ववितर्कसप्रविचार	१५१	२१
पोतज	२४	१९
पौषध	७८	१०
प्रकीर्णक	२८	१४
प्रकृतिबन्ध	९५	१३
प्रचला	९८	१९
प्रचलाप्रचला	९८	२२
प्रच्छना	१४७	१०
प्रतिक्रमणप्रायश्चित्त	१४४	१६
प्रतिक्रमणालोचितोभयरूपप्रायश्चित्त	१४४	१८
प्रतिरूपकव्यवहार	८२	१०
प्रतिसेवनाकुशील	१५५	१४
प्रतीत्यक्रिया	४६	७
प्रत्यक्ष	४	१
प्रत्याख्यानकषायमोहनीय	१००	६
प्रत्येकनामकर्मन्	११३	१४
प्रथमभावना	७२	११

	पृष्ठं	पङ्क्तिः
प्रथमवर्गणा	१६	१
प्रथमशुक्लध्यान	१५२	१७
प्रथमातिचार	८८	८
प्रथमार्त्तध्यान	१४९	२
प्रदेश	३७	१६
प्रदेशबन्ध	९६	४
प्रदेशविसर्ग	३२	१३
प्रदेशसंहार	३२	११
प्रदीप	५४	१६
प्रमाणसामान्य	३	१५
प्रमाद	९३	१३
प्रमोदभावना	७४	१९
प्रयोगक्रिया	४५	११
प्रयोगगति	३४	२१
प्रयोगबन्ध	३६	६
प्रवचनवात्सल्य	६६	६
प्रवीचार	२८	१८
प्रशंसा	६६	२०
प्राण	३३	८
प्राण	११०	२२
प्राणातिपातक्रिया	४६	१
प्राणातिपातविरति	६९	९
प्राणापानपर्याप्ति	११३	७

	पृष्ठं	पङ्क्तिः
प्राद्वेषिकक्रिया	४५	२१
प्रायश्चित्त	१४४	८
प्रेष्यप्रयोग	८७	१५
बकुशनिर्ग्रन्थ	१५५	३
बन्ध	३९	९
बन्धननामकर्मन्	१०८	५
बन्धसामान्य	९४	२०
बन्धातिचार	८०	१७
बहुग्राहित्व	६	१२
बहुविध	६	१४
बादरनामकर्मन्	११२	१२
बादरस्कन्ध	३५	१८
बालतपस्	६३	८
बाह्यनिर्वृत्ति	१९	६
बोधिदुर्लभभावना	१३१	२
ब्रह्मचर्य	१२७	५
भक्ति	६५	१७
भयनिश्रितवचनप्रत्याख्यान	७१	१४
भयमोहनीय	१०२	१६
भयमोहनीयाश्रव	६१	१०
भवनपति	२७	१६

	पृष्ठं	पङ्क्तिः
भव्यत्व	१७	१९
भाव	३	१०
भावना	१२७	७
भावमनस्	११	१६
भावशौच	५७	७
भावसंलेखना	७९	१६
भावसंवर	१२२	८
भाषा	३३	६
भाषापर्याप्ति	११३	१०
भाषासमिति	१२४	११
भेद	३७	६
भोगान्तराय	११५	१७
भोगोपभोग	७७	१५
मतिज्ञान	४	७
मतिज्ञानावरण	९७	१२
मनःपर्याप्ति	११३	१२
मनःपर्ययज्ञान	११	१२
मनःपर्ययज्ञानावरण	९७	११
मनःप्रवीचार	२९	७
मनुष्यगति	२७	४
मनुष्यगतिनामकर्मन्	१०६	८
मनुष्यायुष्	१०४	४

	पृष्ठं	पङ्क्तिः
मनोगुप्ति	७०	९
मनोगुप्ति	१२३	१२
मनोदुष्प्रणिधान	८७	६
मनोनिसर्गाधिकरण	५३	९
मनोयोग	४२	१८
मरण	३४	१
मरणाशंसा	८९	२०
मात्सर्य	५४	१९
मात्सर्य	८९	८
माध्यस्थ्य	५७	२
मानसिकशुभाश्रव	४३	२
मानसिकाशुभाश्रव	४३	५
मानुषायुराश्रव	६२	९
मायाप्रत्ययिकक्रिया	४५	१६
मारणाधिकरण	४८	९
मारणान्तिकी	७९	११
मार्गप्रभावना	६६	२
मार्दव	१२५	१५
मित्रानुराग	९०	२
मिथ्यक्रिया	४५	४
मिथ्यात्व	९९	१४
मिथ्यादर्शन	१६	१७
मिथ्यादर्शनशल्य	७६	११

	पृष्ठं	पङ्क्तिः
मिथ्योपदश	८१	७
मिश्र	३६	१५
मिश्रगति	३५	४
मिश्रयोनि	२३	६
मिश्रयोनि	२३	१४
मिश्रयोनि	२४	३
मुक्त	१८	२
मृषानुबन्धिद्वितीयरौद्र	१४९	२२
मृषावादविरति	६९	११
मैत्रीभावना	७४	१५
मौखर्य	८६	१३
म्लेच्छ	२७	७
यथाख्यातचारित्र	१४०	३
यशःकीर्त्तिनामकर्मन्	११४	८
योग	४१	१५
योग	४२	७
योग	५६	१४
योगवक्रता	६३	१९
योनि	२२	२१
रतिमोहनीय	१०२	१०
रसना	२०	६
रसपरित्याग	१४२	१७

	पृष्ठं	पङ्क्तिः
रहस्याभ्याख्यान	८१	९
रूपप्रविचार	२९	३
रौद्रध्यान	१४८	७
लब्धीन्द्रिय	१९	१८
लिङ्ग	१६	१६
लिङ्गकुशील	१५५	२०
लिङ्गपुलाक	१५४	१९
लीनता	१४३	२
लेश्या	१७	१
लोकपाल	२८	१०
लोकभावना	१३०	१७
लोभनिश्रितवचनप्रत्याख्यान	७१	१०
लोमाहार	२२	७
वंशीपत्रयोनि	२४	८
वक्रगति	२०	११
वध	५५	१७
वधातिचार	८०	१५
वर्णानुपात	८७	२१
वर्तना	३४	८
वाग्गुप्ति	१२३	१४
वाग्दुष्प्रणिधान	८७	४
वाग्निसर्गाधिकरण	५३	११

	पृष्ठं	पङ्क्तिः
वाग्योग	३३	४
वाग्योग	४२	१६
वाचना	१४७	९
वाचिकाशुभास्रव	४३	९
वासना	५	१८
वास्तुप्रमाणातिक्रम	८४	२
विचिकित्सातिचार	८०	७
विदारणक्रिया	४६	१६
विधिविशेष	९०	१८
विनय	१४५	१४
विनयसंपन्नता	६४	१०
विपाक	११६	१६
विपाकविचय	१५१	६
विपुलमति	११	२२
विरति	६९	६
विरुद्धराज्यातिक्रम	८२	६
विवाह	८२	१८
विविक्तशय्यासन	१४२	२१
विवृतयोनि	२३	९
विवेकप्रायश्चित्त	१४४	२०
विश्वस्तमन्त्रभेद	८१	१६
विषयानुबन्धिरौद्रध्यान	१५०	५
विसंवादन	६३	२०

	पृष्ठं	पङ्क्तिः
विस्रसागति	६९	२
विहायोगतिनामकर्मन्	११०	४
विहायोगतिनामकर्मन्	११०	११
वीर्यान्तराय	११५	२०
वृत्तिपरिसंख्यान	१४१	१२
वेदक	१३	२
वेदनोत्थद्वितीयार्त्तध्यान	१४९	७
वैक्रिय	२२	१०
वैक्रियशरीर	१०७	२
वैक्रियशरीरनामकर्मन्	१०७	३
वैनयिकी	१०	१
वैमानिक	२७	२१
वैयावृत्त्य	६५	१३
वैराग्य	७५	१७
व्यञ्जनावग्रह	४	२२
व्यन्तर	२७	१८
व्यय	३	१२
व्यवहार	९	१
व्रतिन्	७५	२१
शङ्कातिचार	८०	२
शङ्खावर्त्तयोनि	२४	९
शब्द	९	१०
शब्द	३६	३

	पृष्ठं	पङ्क्तिः
श्रुतज्ञान	१०	१८
श्रुतज्ञानावरण	९७	१३
श्रुतनिश्रितमति	४	१२
श्रुतावर्णवाद	५८	११
श्रोत्रेन्द्रिय	२०	३
संग्रह	८	१५
संघ	५९	११
संघातनामकर्मन्	१०८	१६
संघावर्णवाद	५८	२०
संघावर्णवाद	५९	८
संज्ञिन्	२०	१०
संज्वलन	१००	१०
संयम	५६	११
संयम	१२६	१३
संयमासंयम	६२	२१
संयमिसङ्घावर्णवाद	५९	२
संयुक्ताधिकरण	८६	१५
संरम्भ	४९	८
संलेखना	७९	८
संवर	१२२	४
संवरभावना	१२९	१७
संवृत्तबकुश	१५९	८

	पृष्ठं	पङ्क्तिः
संवृत्तयोनि	२३	१
संवेग	६५	७
संवेग	७५	११
संसारभावना	१२८	७
संसारित्व	१८	४
संस्थाननामकर्मन्	१०८	१७
संस्थानविचयधर्म	१५१	९
संहनन	१०८	२०
सचित्तनिक्षेप	८९	२
सचित्तपिधान	८९	४
सचित्तमिश्राहार	८५	२०
सचित्तसंवद्धाहार	८५	१६
सचित्ता	२३	१०
सत्कार	९१	३
सत्यभाषा	१२६	८
सद्भावप्रतिषेध	६८	६
समनस्क	१८	६
समभिरूढ	९	१५
समादानक्रिया	४५	५
समाधि	६५	११
समारम्भ	४९	१०
समिति	१२४	३
समूर्च्छिम	२२	१२

	पृष्ठं	पङ्क्तिः
सम्यक्चारित्र	२	१७
सम्यक्त्व	१३	१८
सम्यक्त्व	९९	१३
सम्यक्त्व	१२०	३
सम्यक्त्वक्रिया	४५	३
सम्यगनशनतपस्	१४१	१९
सम्यग्ज्ञान	२	१३
सम्यग्दर्शन	२	५
सराग	५६	१०
सरागसंयम	६२	२०
सर्वविरति	६९	१९
सहसाभ्याख्यान	८१	११
सांपरायिकाश्रव	४४	४
साधारणनामकर्मन्	११४	१९
सामन्तोपनिपातिकी	४६	१०
सामानिक	२८	६
सामान्यरौद्रध्यान	१५०	९
सामायिक	७८	३
सामायिक	१३८	१६
सार	९१	६
सुख	३३	१७
सुखानुबन्ध	९०	४
सुभगनामकर्म	११४	१

	पृष्ठ	पङ्क्तिः
सुस्वरनामकर्मन्	११४	२
सूक्ष्मकुशील	१५६	१
सूक्ष्मनामकर्मन्	११४	१३
सूक्ष्मपुलाक	१५४	२१
सूक्ष्मबकुश	१५५	९
सूक्ष्मसंपराय	१३९	२१
सूक्ष्मस्कन्ध	३५	१६
सोपक्रम	२६	१५
सौक्ष्म्य	३६	१७
स्कन्ध	३५	११
स्तेनप्रयोग	८२	२
स्तेय	६८	१६
स्तेयविरति	६९	१३
स्तेयानुबन्धिन्	१५०	३
स्त्यानर्द्धि	९९	३
स्त्रीलिङ्ग	२६	६
स्त्रीवेदमोहनीय	१०३	२
स्त्रीवेदाश्रव	६०	१४
स्थापना	३	४
स्थावर	१८	९
स्थावरनामकर्मन्	११४	१२
स्थितिबन्ध	९५	१६
स्थिरनामकर्मन्	११३	१६